No. ५२६ क ५६५१

Title ज्वालापञ्चाङ्गम्

Author

Extent ८६ पत्र Age

Subject तन्त्र

बालापंचांग नं. ५१९

९



5951

F — 5

2nd
Misery # 27
F — 84 − 1 = 63

3rd Part Tripple # 2
F — Tr+2 = 15

Total # F = 05
63
15

Complete 83


श्री रणबीर पुस्तकालय
मंदिर श्री रघुनाथ जी

बा ॐ श्रीबालाभगवत्यैनमः श्रीदेव्युवा
प॰ट॰ च ॐ भगवन्देवदेवेश सर्वज्ञ परमे
१ श्वर सर्वेश सर्वशास्त्रज्ञ सर्वातीत स
नातन् अन्तर्यामि देविबालायाः पंचांग
सुरवंदितं वद मे कृपया नाथ दयाह्लो
स्मि महेश्वरं श्रीभैरव उवाच शृणु देवि
प्रवक्ष्यामि बालायाः परमेश्वरि पंचां
गं परमेशानि सर्वतंत्रोत्तमोत्तमं पट
लं पद्धतिं वर्म मंत्रं नाम सहस्रकं स्तो
त्रं मत्तु मयं देवि पंचांगमिदमुच्यते त
न्त्रादौ पटलं वक्ष्ये न वश्रीम्या वरानने
शृणुष्वैकमना भूत्वा कोटिजन्माघनाश
नं मंत्रोद्धारं प्रवक्ष्यामि सर्वतंत्रोत्तमोत्त
मं यं जप्त्वा साधकः शीघ्रं जीवन्मुक्तो भ
विष्यति वाग्भवं कामराजस्थ शक्तिमध्ये
मिर्यन्यसेत् नमोंतो देवि बालाया मंत्रो

ऐंवाग्भवर्णकः ऋषिःस्याद्दक्षिणामूर्तिः
पंक्तिश्छंदःसमीरितं वालात्रिपुरादेवि दे
वतापरिकीर्तिता वाग्वीजंवीजमाख्यातं
शक्तिःशक्तिसमीरिता कामराजःकी
लकंचचतुर्वर्गस्यसाधने विनियोगेम
हेशानिकीर्तितःपरमेश्वरि वाणीशक्ति
कामराजैःषडंगन्यासईरितः ध्यानंच
स्येमहेशानिसर्वतंत्रेषुगोपितं ग्रह ए
किरणजाले रतिनाथाउत्कीलनमतुं
देविवक्ष्येहंदेवदुर्लभं वाणीमंत्रेत्रिरु
च्चार्यभवेदुत्कीलनंमनोः संजीवनमं
त्रंवक्ष्येशृणुपार्वतिसादरं शक्तिमादौ
पठेद्देविमूलमंत्रस्यसाधकः संजीव
नाख्योमंत्रोयंदेव्यामंत्रस्यसिद्धये विद्या
शापहरींवक्ष्येतवस्नेहात्सुरेश्वरि नागं
परंरमेवालेशिवशापंविमोचय वि

शावकाषाविधृतजपवटीकाभ्रकाका भीतिहस्ता इनरकरववरा
व्याफुलकल्हारसंस्थानिवसतहृदिबालानित्यकल्याणशीला ४

बा॰ प॰ ट॰ १ मांबंयह रेवेनी बाला शापह रीस्तृता एवं
संस्कृत्य मूलं वैजपेन्साधक सत्तमाः वर्णि
लं तं महादेवि कालत्रयमथापि वा ततः
सिद्धो मनुर्देवि भवेन्नात्र संशयः जपा
त्सिद्धिर्जपात्सिद्धिर्जपात्सिद्धिर्महेश्वरि
२ नस्तवान्नार्चनाद्ध्यानात्सिद्धिर्भवतिनाद्दशी
ततः संपुटमंत्रं वै जपेन्मंत्रस्य सिद्धये द
याद्धि शक्तिवीजं तत्सादौ मूलस्य साधकः
संपुटाख्योस्य यंमंत्रः सर्वमंत्रोत्तमोत्तमः
यंत्रोद्धारं प्रवक्ष्यामि शृणु मत्प्राणवल्लभे
श्रीबालायाश्चप्रत्यर्था मेदरिरेखं दरं महत्
अथयंत्रोद्धारः विंदुत्रिकोणरसकोण
कनागपत्रं हतत्रयोविनमहीसदनत्र
यं च बालादिचक्रमिदमाहिहरेगिरीश
यन्त्रेः दविस्तनमितं मयातेलं योगं ग्रा
णदेवशियंत्रमस्य महेश्वरि प्राणपोनि

मदिनं॰ ५

मध्ययोन्योश्चलंतराले महेश्वरि उत्पप
क्तिपूजनीयानर्पणीयाच पार्वति आग्ने
व३ येहृदयंचैवैशानेशिरएवच शिखां
चैवतुनैरृत्येवायव्येकवचंतथा मध्ये
नेत्रंचसंपूज्यस्त्रंदिक्षुवनस्त्रश्च वामा
वर्तेनत्वाग्नेय्यांक्रांतिंप्रीतिंमनोभवम्
त्रिकोणेपूजयेद्देविवाणान्पंचवत्तत्रवै न
उत्तरेक्षोभणंचैवशारदंद्रावणमेवच दक्षे
ल्याकर्षिणंवाणंवशीकरणमेवच अग्रे
उन्मादनंनामपूजयेत्तमहेश्वरि पुन
श्चैवोत्तरेकामंमन्मथंचमहेश्वरि दक्षेचै
वतुकंदर्पंमकरध्वजमेवच अग्रेवैमी
नकेतुंचत्रिकोणेपूजयेच्छिवे अष्टयो
निषुपूर्वादिष्वनंगकुसुमादिकाः अने
गकुसुमाचैवतथानंगमेखला अ
नंगमदनांचैवह्यनंगमदनातुरा स्व

१. भगाचभगाचैवतथाचभगमालिनी भग
मालाचपूज्यावैवामावर्त्तेनदेवताः ततो
ऽपरेदेवेशिशक्तिपुत्रांस्तुभैरवान् अ
सितांगंचब्राह्मींचमाहेश्वरींरुरुंतथा
चंडंचैवतुकौमारींक्रोधेशंवैष्णवींतथा
उन्मत्तंचैववाराहींकपालिंभैरवंतथा मा
हेंद्रींभीषणंचैववामुंडांपरमेश्वरी सं
हारंनारसिंहींचसहैःषोडशभिःसह ग्रे
थिस्थानेषुदेवेशिपश्चिमादिक्रमेणतु का
मरूपेमहादेविपीठंपूज्यंप्रयत्नतः मल
याचलमीशानिकौलाचलमतःपरं का
लांतकाख्यंपीठंचचौहारंपीठमुत्तमं पी
ठंजालंधरंचैवउड्डियानंतथैवच देव
कूटमपीशानिदेशिकेशःप्रपूजयेत्
हेरुकादीन्साधकेशःपूजयेद्वृत्तमंडले
हेरुकाख्यं भैरवंचवेतालभैरवंतथा

त्रिपुरांतकंभैरवंवैग्निजिह्वकंतथैवच
कालांतकंकपालंवह्येकपादंतथैवच
भीमरूपंचमलयंहाटकेश्वरमेवच प
श्चिमादिक्रमेणैवपूजयेद्भैरवोत्तमान्
ऊर्ध्वंचैवतथाधस्तात्दशादिक्षुसमर्चयेत्
दिक्पालाश्चतरश्चैवपूज्याःसर्वादितःक्र
मात् सायुधाश्चकुलेशानियथाक्रममशे
षतः चतुरश्चैवनिश्चैवपूजयेत्साधकोत्त
मः पश्चिमेवटुकंचैवयोगिनीचोत्तरेत
था क्षेत्रःपालंतथापूर्वेदक्षेगणपतिंत
था वसूंश्चैववायव्येह्येशान्येतु[illegible]वीं
स्तथा रुद्रांश्चैवतथाग्नेय्यांसर्वभूतांश्च
नैर्ऋते रक्षसंपूजितंयंत्रेशीघ्रंसिद्धिप्रदे
ष्टाणां प्रयोगान्प्रवक्ष्यामिशृणुपार्वति
सादरं स्तंभनेमोहनेचैवमारणाकर्ष
णेतथा वशीकारंतथोच्चाटंशांतिकं

बा·
२·

पौष्टिकं तथा एतेषां साधने वक्ष्ये जगतो हि
तकाम्यया शुभक्षायनदानं येन दृष्टं क्वं
कदाचन स्वाङ्गम्यायशायनाज्ञत्वा पेंगृहा नं३
न्तिके मूलेसाधकएवाशुजपेदयुतं संख्यया
होमो जातीफलैः पीतैः पुष्पैश्चघृतमिश्रितैः
शत्रुसैन्यादिदस्यूनां वादिनां स्तंभनं भवेत्
५ सोमे मध्याह्नसमये स्नात्वा कूपजलेन तु
कूपान्तिके मन्त्रजन्मा साधको युतसंख्यया
होमयेद्घृतमिश्रं च माहिषं दधिशर्करं भ
स्मना तिलकं कुर्यान्मोहयेद्भुवनत्रयं भौ
मेर्धरात्रसमये चतुष्पथगतः सुधीः श्र
युतं तु जपेन्मूले होमयेद्घृतपायसं रक्त
चंदनमिश्रं च स्त्रीकेशैश्च समन्वितं श
त्रुः कालं समाप्नोति मृत्युमेष्यति नान्यथा
बुधे निशावसाने च गत्वा शून्यालयं जपेत्
अयुतं मूलमंत्रं तु होमयेद्घृतशर्करं क

णीकारसहस्राणिबिल्वपुष्पाणिपार्वति
रंभायश्चरसोवापिभवेदाकर्षणंध्रुवं
शैलेसूर्योदयेगत्वानदीतीरेचसाधकः
स्मृतेमूलमंत्रेणहोमयेहृतशर्करं क
णीकारसहस्राणिबिल्वपुष्पाणिपार्वति
मूलमंत्रैर्महादेव्याजपेदयुतसंख्यया हो
मःसर्पिर्दधिक्षीरमल्लीकामालतीपुष्पैः
श्रीफलैःसहस्रादेविवशयेद्भुवनत्रयं पु
केनिशामुखेगत्वावटमूलेजपेन्मनुं अयु
तेसाधकोभक्त्याहोमःकार्यस्तुसर्षिपा
दध्याज्यान्नाविमिश्रेणगोमूत्रेणवपायसैः
शत्रोर्मत्स्यहशस्यापिभवेदुच्चाटनंपरं श
नौश्मशानसमयेकृत्वाकर्माह्निकंसुधीः
आगत्यार्वनशाय्यांतजपेन्मंत्रमयुतंशिवे
होमयेत्सर्पिरंभोजसहस्राणिवतर्दपा अ
हाणंदेवकोमानेयन्नानोराशसोनया:

बा॰ उपद्रवाणांसर्वेषांभयानांन्नपतेस्तथा
पट॰ क्रूराणामुनिहन्त्रीणांमहाशान्तिःप्रजायते
५ सर्ववारेषुसर्वत्रजपेन्मंत्रंसदाशुते होम
येद्दधिक्षीरमिश्रंचंदनमिश्रितं पायसं
नक्रमिश्रंचमीनमांससमन्वितं देवतानां
मनुष्याणांरोगार्तानांमहेश्वरि ब्रह्मादी
नांनृपादीनांमहापुष्टिःप्रजायते इतीदं
पटलंगोप्यंसर्वतंत्रेषुगोपितं गोप्यंगो
प्यंमहागोप्यंगोप्यंगोप्यंप्रयत्नतः नवस्ने
हान्नयाख्यानंगोपनीयंस्वयोनिवत् इ
तिश्रीरुद्रयामलेतंत्रेश्रीबालात्रिपुरसुं
दरीपटलंसमाप्तम् ॥

बा॰ प॰ १

ॐ नमस्त्रिपुरसुन्दर्यै श्रीभैरव उवाच
ॐ अधुना पद्धतिं वक्ष्ये श्रीबालार्चनसं
युतां गद्यपद्यमयीं गोप्यां सकलागम
निश्चितां प्रातःकृत्यमकृत्वा तु यो देवी
भक्तितोर्चयेत् तस्य पूजा तु विफला।
शौचहीना यथा क्रिया तत्र श्रीमान्सा
धको ब्राह्मे मुहूर्ते शयनतलादुत्थाय
करचरणादिकं प्रक्षाल्य निजासने स
मुपविश्य निजशिरसि श्वेतवर्णो यो
मुखसहस्रदलकमलकर्णिकांतर्ग
तचंद्रमंडलसिंहासनोपरि निषण्णं स्व
गुरुं शुक्लवर्णं शुक्लालंकारभूषितं
ज्ञानानंदमुदितमानसं सच्चिदानंद।
वि[illegible] त्रिनयनं चतुर्भुजं ज्ञानमुद्रा

पुस्तकां वराभयकरं वामांगे वामहस्त
धृतकमलया रक्तवसनाभरणया स्वप्रि
यया दक्षभुजेनालिंगितं सर्वदेवादिदे
वं परमशिवस्वरूपं शांतं सुप्रसन्नं ध्या
त्वा तच्चरणकमलयुगलविगलदमृ
तधारया स्वात्मानं सततं विभाव्य मान
२१ सोपचारैर्यजेद्यथा लं पृथिव्यात्मकं
गंधं समर्पयामि नमः हं आकाशात्म
कं पुष्पं समर्पयामि नमः यं वाय्वात्म
कं धूपं समर्पयामि नमः रं वह्न्यात्मकं
दीपं समर्पयामि नमः वं अमृतात्मकं
नैवेद्यं समर्पयामि नमः सं सर्वात्मकं
फलमूलतांबूलादिकं समर्पयामि नमः
इत्थं समभ्यर्च्य ॐ ऐं ह्रीं श्रीं ह्स [illegible] ह्सौः

बा० प० २

८

इति दशधा विसृष्य मनसा दंडवत्प्रणा

मं कुर्यात् ॐ सहस्रदलपंकजे सक

लशीतरश्मिप्रभं वराभयकरांबुजं

विमलगंधपुष्पांबरं प्रसन्नवदने क्ष

णं सकलदेवतारूपिणं स्मरेच्छिरसि

सर्वगं तदभिधानपूर्वं गुरुं इति ध्यात्वा

प्रणाममंत्रान्पठेत् ॐ नमामि सद्गुरुं

शांतं प्रत्यक्षं शिवरूपिणं शिरसा यो

गपीठस्थं मुक्तिकामार्थसिद्धये १

श्रीगुरुं परमानंदं वंदाम्यानंदविग्रहं

यस्यसान्निध्यमात्रेणचिदानंदायतेपरं १
अखंडमंडलाकारंव्याप्तंयेनचराचरं त
त्पदंदर्शितंयेनतस्मैश्रीगुरवेनमः ३
अज्ञानतिमिरांधस्यज्ञानांजनशलाकया
चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेनमः ४
गुरुःब्रह्मागुरुःविष्णुःगुरुःसाक्षान्महेश्व
रः गुरुरेवजगत्सर्वंतस्मैश्रीगुरवेनमः ५
नमस्तेनाथभगवन्शिवायगुरुरूपिणे
विद्यावतारसंसिद्धैस्वीकृतानेकविग्रह ६
नवायनवरूपायपरमार्थैकरूपिणे सर्वा
ज्ञानतमोभेदभानवेचिद्घनायते ७ स्व
तंत्रायदयाक्लृप्तविग्रहायपरात्मने पर
तंत्रायभक्तानांभव्यानांभव्यरूपिणे ८ वि
वेकिनांविवेकायविमर्शायविमर्शिनां

वा. प. ३

प्रकाशिनांप्रकाशायज्ञानिनांज्ञानरूपिणे
पुरस्तात्पार्श्वयोःपृष्ठेनमस्कुर्य्यामुपर्य्यधः
सदामच्चित्तरूपेणविधेहिभवदासनं ९
इतिश्रीगुरुंप्रणम्य स्वप्रसन्नंविभाव्य म
नसातदाज्ञांगृहीत्वा मूलाधारेस्वर्णवर्ण
चतुर्दलकमलकर्णिकांतर्गतशृंगाट।
कांतर्गतत्रिकोणपीठोपरिपरांशक्तिंकुं
डलिनीं सर्पाकारामूर्ध्वमुखीं सार्धत्रिवल
यांउद्यद्दिनकरसहस्रभास्वरांविद्युत्कोटि
संनिभां विसतन्तुतनीयसींपंचाशद्वर्ण
विग्रहामष्टात्रिंशत्कलारूपिणीं क्रिया
मयामाने सर्वप्राणिजीवांसर्वदेवाधिदे
वीं सकलमंत्रमातरं स्वमेंविभाव्य श्री
गुरूपदिष्टनिजसहजनादेनसचैतन्यां

3

विधाय तत्र चतुर्द्दलेषु वंनमः शंनमः
षंनमः संनमः इतिपत्रेषु मध्येमूले
नेव षादह्निणपेन संपूज्य पूर्वोक्तमंत्रे
णकमलात्कमलेनीत्वा ततःस्वाधिष्ठा
नेलिंगमूलेविद्रुमवर्णे षड्दलकमले ५५
तोष्ठाप्य तत्र बंनमः भंनमः मंनमः
यंनमः रंनमः लंनमः इतिपत्रेषुमध्ये
मूलेनैव संपूज्य ततोमणिपूरकेनाभौ
नीलवर्णेदशदलकमलेतोनीत्वा त
त्र डंनमः ढंनमः णंनमः तंनमः थं
नमः दंनमः धंनमः नंनमः पंनमः
फंनमः इतिश्रीपत्रेषुमध्येमूलेनैव
संपूज्य ततोवक्षस्यनाहते पिंगलव
र्णेद्वादशदलकमले तोष्ठाप्य तत्र
कंनमः खंनमः गंनमः घंनमः ङंन
मः चंनमः छंनमः जंनमः झंनमः

बा॰ प॰ ५

ञं नमः टं नमः ठं नमः इति पत्रेषु मध्ये
मूलेन च सममभ्यर्च्य ततो विशुद्धौ कंठे
धूम्रवर्णे षोडशदलकमले तां नीत्वा
तत्र अं नमः आं नमः इं नमः ईं नमः उं
नमः ऊं नमः ऋं नमः ॠं नमः ऌं नमः
ॡं नमः एं नमः ऐं नमः ओं नमः औं नमः
अं नमः अः नमः इति पत्रेषु मध्ये मूले
न च प्रपूज्य ततो भ्रूमध्ये आज्ञाचक्रे वि
द्युद्वर्णे द्विदलकमले तां नीत्वा तत्र
हं नमः क्षं नमः इति पत्रयोर्मध्ये मूले
न च संपूज्य ततो द्वादशांतचक्रे ब्रह्मरं
ध्रे प्रापय्य तत्र सहस्रदलकमले विंदु
रूपतेजोमयपरमशिवेन सहैकतां नी
त्वा ततः स्रवतापरमामृतेन तां सं
तर्प्य तत्र नादश्रवणतत्परो मुहूर्तं वि
श्रम्य ततो वरोहे सर्वत्र सोहमिति मत्वे
लंय

ण कमलात्कमलेवारोहमाणा मात्रा
चक्रादिक्रमेणतेषुतेषुकमलेषुतैस्तै
रत्नैः संपूज्यमानां तत्तदाधारतत्तद्धातत
त्त्वाणितत्तदधिदेवताः संतर्पयंती मू
लाधारं प्राप्य तत्रैव स्वस्थाने संस्थाप
येत् इत्यारोहावरोहक्रमेण परां शक्तिं
कुंडलिनीं ध्यात्वा ॐ प्रकाशमानां प्रथ
मे प्रयाणे प्रतिप्रयाणे प्यमृतायमानां
अंतः पदव्यामनुसंचरंतीमानंदरूपाम
बलां प्रपद्ये इति विचिंत्य ॐ नाहमस्मि
न चान्योस्ति ध्येयं चात्र न विद्यते आनंद
पदसंलीनं मनस्समरसीगतं अहं देवी
न चान्योस्मि ब्रह्मैवाहं न शोकभाक् स
च्चिदानंदरूपोहं स्वात्मानमिति चिंतयेत्
इति संस्मृत्य मूलादिब्रह्मरंध्रांतं मूल
विद्यां उद्यद्दिनकरसहस्रभाम[illegible]ां तेजो

रा ३

बा॰ प॰ ५

मयीमनस्कं ध्यात्वा ततो जस्रादात्मसंस्थदे
हं विचिंत्य ततो जस्रात्परिणतां श्रीपरदे
वतां विभाव्य प्राणायामत्रयं कुर्यात् त
द्विधिर्यथा तत्र मूलं प्रणवं वा षोडशवा
रमुच्चरन्दक्षांगुष्ठेन दक्षनासापुटं निरु
ध्य वामेन पवनं पूरयेत् ततस्तमेव चतु
ष्षष्टिवारमुच्चरन्दक्षनासाकनिष्ठाभ्यां वा
मपुटं च निरुध्य द्वाभ्यां पवनं कुंभयेत्
ततस्तमेव द्वात्रिंशद्वारमुच्चरन्वामपुटं
तथैव निरुध्य दक्षपुटेन शनैः शनैः प
वनं रेचयेत् इत्येकः प्राणायामः एवप
वविपर्ययेण क्रियमाणो द्वितीयः प्रथ
मवत्तृतीयः तदुक्तं इडयापिबषोडशा
भिः पवनं कुरुषष्टिचतुष्टयमंतरगं स
जपिंगलया शनकैः शनकैर्दशभिर्दश
भिर्दशभिर्द्व्यधिकैः इत्थं प्राणायामत्र

येण निरस्तसकलकल्मषंस्वदेहं देव
तायतनयोग्यंविभाव्य स्वमूलमंत्रस्य
ऋष्यादिस्मरणंविदधीतयथा ॐअस्य
श्रीबालात्रिपुराभगवतीमंत्रराजस्य
श्रीदक्षिणामूर्तिर्ऋषिः पंक्तिश्छंदः श्री
बालात्रिपुराभगवतीदेवता ऐंबीजं
सौः शक्तिः क्लींकीलकं ममचतुर्विधपु
रुषार्थसिद्धयेश्रीजपेविनियोगः इति
कृतांजलिः स्थात्पसेत् श्रीदक्षिणामू
र्तिऋषयेनमः शिरसि पंक्तिछंदसेन
मोमुखे श्रीबालात्रिपुराभगवतीदेव
तायैनमोहृदि ऐंबीजायनमोगुह्ये सौः
शक्तयेनमः पादयोः क्लींकीलकायन
मोनाभौ ममचतुर्विधपुरुषार्थसिद्धये
श्रीजपेविनियोगः सर्वांगेषु इतिऋष्या
दिन्यासः अथकरन्यासः ऐंअंगुष्ठाभ्यां

बा· पं· ८

नमः क्लींतर्जनीभ्यांनमः सौंःमध्यमा
भ्यांवषट् ऐंअनामिकाभ्यांहूं क्लींक
निष्ठिकाभ्यांवौषट् सौंःकरतलकरपृ
ष्ठाभ्यांनमःफट् अथहृदयादिन्यासः
ऐंहृदयायनमः क्लींशिरसेस्वाहा सौंः
शिखायैवषट् ऐंकवचायहुं क्लींनेत्रत्र
यायवौषट् सौंःअस्त्रायफट् अथध्यानं
ॐमूलादिब्रह्मरंध्रांतेविसतंतुतनीय
सी भ्रमद्भ्रमरनीलाभधम्मिल्लामलपु
ष्पिणी ब्रह्मरंध्रस्फुरद्दिव्यसुखरेखावि
राजितां सुखरेखालग्नरत्नतिलकांसुकु
टोज्वलां विशुद्धमुक्तावज्राढ्यवेइरेखा
किरीटिनीं भ्रमद्भ्रमरनीलाभनयनत्रय
राजितां सूर्यभास्वन्महारत्नकुंडलालंकृ
तांपरां स्फुटाकारस्फुरन्मुक्ताहारभूषणा
भूषितां ग्रैवेयांगदपद्मालिस्फुरत्कांतिवि

राजितां गंगातरंगकर्पूरशुभ्रांबरविरा
जितां श्रीखंडवल्लीसदृशबाहुवल्लीवि
राजितां कंकणादिलसद्भूषामणिवंथल
सत्प्रभां प्रवालपल्लवाकारपाणिपल
वशोभितां वज्रवैडूर्यमुक्तालिमेखलां
विमलप्रभां रक्तोत्पलदलाकारपादप
ल्लवशोभितां नक्षत्रमालासंकाशमुक्ता
मंजीरमंडितां वामेनपाणिनैकेनपुस्त
कंचापरेणतु अभयंचप्रयच्छंतींसाथ
कानांवराननेे अक्षमालांचवरंदक्ष
पाणिद्वयेनतु दधतींचिंतयेद्देवींवश्य
सौभाग्यवाक्प्रदां ह्रीरझैंदैंडयवलांप्र
सन्नांसंस्मरेत्प्रिये ॐअरुणकिरणजा
लैरंजिताशावकाशा विधृतजपवटी
काप्रुस्तकाभीतिहस्ता इतरकरवरा
ढ्याफुल्लकल्हारसंस्था निवसतुहृदि

बा० पं० ७

वालानित्यकल्याणशीला इति स्वहृदय
कमले स्वाभेदेन श्रीदेवीं ध्यात्वा मंत्रसं
स्कारं कुर्यात् क्लीं सौः ऐं ऐं ऐं इत्युत्कीलनं
त्रिर्जपेत् सौः ऐं क्लीं इति संजीवनं ३ ऐं
फं बं मूलं भं मं इतिनौटिल्यं त्रिः ३ ओं क्लीं
श्रीबाले शिवशापं मोचय २ फट् स्वाहा
इति शापहरीं दशधा जपेत् ऐं नमः स्थिउ
ग्राय दह २ हरितं क्लीं हन २ कीलान्
सौः स्वाहा इत्यस्त्रविद्यां त्रिः ३ ओं ऐं वागीश्व
रि विद्महे क्लीं कामेश्वरि धीमहि सौः त
न्नः शक्तिः प्रचोदयात् इति मूलगायत्रीं
दशधा जप्त्वा ततो मालामादाय ओं माले
माले महामाये सर्वशक्तिस्वरूपिणि च
तुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव
ओं ह्रीं सिद्ध्यै नमः इति मन्त्रमालां गंधादिना संपू
जितां म. [illegible] गं स्वविघ्नं कुरु माले त्वं इति

दक्षिणकरेण गृहीत्वा श्रीकामेश्वरभैरवं
यथावद्यथाशक्ति जप्त्वा पूर्वोक्तविधिना
श्रीपरदेवतां हृदि ध्यायन् यथाशक्ति ज
पं विधाय त्वं माले सर्वदेवानां प्रीतिदा शु
भदा भव शुभं कुरुष्व मे भद्रं यशो वीर्यं द
दस्व मे इति पठन् मालां शिरसि संस्थाप्य
सौः ऐं क्लीं इति संपुटमेतं त्रिर्जप्त्वा पुनरपि
प्राणायामऋष्यादिकरषडंगन्यासान्वि
धाय गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृ
तं जपं सिद्धिर्भवतु मे देवि त्वत्प्रसादान्म
हेश्वरि इत्यनेन तेजोमयं जपफलं श्री
देवतावामहस्ते समर्प्य योनिमुद्रया प्र
णमेत् प्राज्ञः प्रभृति सायांते मायादिप्रा
नरं ततः यत्करोमि जगद्योने तदस्तु तव
पूजनं इति निजकृत्यं समर्प्य त्रैलोक्यचै
तन्यमये सुरेशि श्रीसंदीविनचरणौ ज्ञा

बा॰ यैव प्रातः समुत्थाय तव प्रियार्थं संसार
प॰ यात्रामनुवर्तयिष्ये संसारयात्रामनुव
८ र्तमानेन त्वदाज्ञया श्रीत्रिपुरेशि वाले स्व
र्यातिरस्कारकलिप्रमादभयानि मां माभि
भवंतु मातः जानामि धर्मं न च मे प्रवृत्तिर्
जानाम्यधर्मं न च मे निवृत्तिः त्वया हृषी
केश हृदिस्थया हं यथा नियुक्तोस्मि तथा
करोमि इति श्रीदेव्याज्ञां संप्रार्थ्य मूलाधा
रादि द्वादशांतचक्रपर्यंतस्थिताभ्यो ग
णपतिप्रभृतिदेवताभ्यो गुरूपदेशात्ता
न्सहजसिद्धमजपाजपं समर्पयेत् यथा
ॐ अद्य पूर्वेद्युरहोरात्रावरितमुच्छ्वासनिः
श्वासात्मकं षट्शताधिकमेकविंशति
सहस्रसंख्याकमजपाजपं मूलाधारस्वा
धिष्ठानमणिपूरकानाहतविशुद्धाज्ञाच
क्रब्रह्मरंध्रेषु चतुर्दलषड्दलदशदल

द्वादशादलषोडशादल द्विदलसहस्रद
लेषु स्वर्णविद्रुमनीलपिंगल धूम्रवि
द्युत्कर्बुरवर्णेषु स्थिताभ्यो गणपतिब्र
ह्मविष्णुरुद्रजीवात्मपरमात्मश्रीगुरुपा
दुकाभ्यो यथाभागशः समर्पयामि इ
ति कृतांजलिः संकल्पसमर्पयेत् ॐ ऐं
ह्रीं श्रीं मूलाधारचक्रस्थाय गणपतये ज
पाजपानां षट्शतानि समर्पयामि नमः
ॐ ऐं ह्रीं श्रीं स्वाधिष्ठानचक्रस्थाय ब्रह्मणे
जपाजपानां षट्सहस्राणि समर्पयामि
नमः ॐ ऐं ह्रीं श्रीं मणिपूरचक्रस्थाय वि
ष्णवे जपाजपानां षट्सहस्राणि समर्प
यामि नमः ॐ ऐं ह्रीं श्रीं अनाहतचक्रस्था
य रुद्राय जपाजपानां षट्सहस्राणि समर्प
यामि नमः ॐ ऐं ह्रीं श्रीं विशुद्धचक्रस्था
य जीवात्मने जपाजपानां सहस्रं समर्पया

बा॰
प॰
९

मिनमः ॐ ऐं ह्रीं श्रीं श्रां त्रां चक्रस्थाय प
रमात्मने जपाजपानां सहस्रं समर्पया
मि नमः ॐ ऐं ह्रीं श्रीं सहस्रदलकमलक
र्णिकामध्यवर्तिन्यै श्रीगुरुपादुकायै अ
जपाजपानां सहस्रं समर्पयामि नमः इ
ति समर्पयेत् अथवा एतावत्कर्मशक्त
श्चेत् ॐ अद्य पूर्वेद्युरहोरात्राचरितमुच्छ्वा
सनिःश्वासात्मकं षट्शताधिकमेकविं
शतिसहस्रसंख्याकमजपाजपं सहस्र
दलकमलकर्णिकामध्यवर्तिनो श्रीगु
रुपादुकायै एव समर्पयेत् ॐ अद्य सूर्यो
दयमारभ्यागामिसूर्योदयं यावदहोरा
त्रेणाचरितं उच्छ्वासनिःश्वासात्मकं ष
ट्शताधिकमेकविंशतिसहस्रसंख्या
कमजपाजपमहं करिष्ये इति कृतां ज
[illegible]ल्प अजपामंत्रेण प्राणायामं

ॐकारस्तत्वं उदात्तः स्वरः नभःस्थानम् हैमोवर्णः ८४

विधाय ॐअस्यश्रीअजपागायत्रीमंत्र
स्य हंसऋषिः अव्यक्तगायत्रीछंदः प
रमात्मादेवता हंबीजं सःशक्तिः सोहं
कीलकं ममसुक्तिसाधनेजपेविनियो
गः स्वशिरसि ॐऐंह्रींश्रीं हंसात्मनेऋष
येनमः मुखे ॐऐंह्रींश्रींअव्यक्तगायत्री
छंदसेनमः हृदये ॐऐंह्रींश्रींपरमहंस
देवतायेनमः मूलाधारे ॐऐंह्रींश्रीं हं
बीजायनमः पादयोः ॐऐंह्रींश्रींसःश
क्तयेनमः नाभौ ॐऐंह्रींश्रींसोहंकील
कायनमः हृदये ॐऐंह्रींश्रीं ॐकारत
त्वायकंठे ॐऐंह्रींश्रींउदात्तायस्वरायन
मः मूर्ध्नि ॐऐंह्रींश्रींनभसेस्थानायनमः
ॐऐंह्रींश्रींहेमवर्णायनमः सर्वांगेषु
इतिविन्यस्य ममसोक्षार्थेजपेविनियो
गः इतिकृतांजलिर्वदेत् ॐऐंह्रींश्रीं सो

बा॰ प॰ १९

सूर्यात्मने स्वाहा अंगुष्ठाभ्यां नमः ॐ ऐं ह्रीं
श्रीं ह्स्रीं सोमात्मने स्वाहा तर्जनीभ्यां स्वाहा
ॐ ऐं ह्रीं श्रीं ह्स्रूं निरंजनात्मने स्वाहा मध्य
माभ्यां वषट् ॐ ऐं ह्रीं श्रीं ह्स्रैं निराभासात्म
ने स्वाहा अनामिकाभ्यां हुं ॐ ऐं ह्रीं श्रीं ह्स्रौः
अनंततनुः सत्मादेवी प्रबोदयात्स्वाहा
कनिष्ठिकाभ्यां वौषट् ॐ ऐं ह्रीं श्रीं ह्स्रः अ
व्यक्तबोधात्मने स्वाहा करतलकरपृष्ठा
भ्यां फट् इति करन्यासः ॐ ऐं ह्रीं श्रीं ह्स्रां सू
र्यात्मने स्वाहा हृदयाय नमः ॐ ऐं ह्रीं श्रीं
ह्स्रीं सोमात्मने स्वाहा शिरसे स्वाहा ॐ ऐं
ह्रीं श्रीं ह्स्रूं निरंजनात्मने स्वाहा शिखायै व
षट् ॐ ऐं ह्रीं श्रीं ह्स्रैं निराभासात्मने स्वाहा
कवचाहुं ॐ ऐं ह्रीं श्रीं ह्स्रौं अनंततनुः सू
त्मादेवी प्रबोदयात्स्वाहा नेत्रत्रयाय वौ
षट् ॐ ऐं ह्रीं श्रीं ह्स्रः अव्यक्तबोधात्मने स्वा

हा अस्त्रायफट् इति षडंगं विधाय ध्याने
ऊर्यात् ॐ गमागमस्थगहनाविष्वन्ये
सद्विस्त्रकाशे तिमिरां तकारे यश्पास्य
हं सर्वं जगास्त्रध्यानं नमामि हं सं परमा
त्ममूर्तिं ॐ द्यां मूर्धानं यस्य विप्रा वदंति
खं वै नाभिं चंद्रसूर्यौ च नेत्रे दिग्भिः श्रोत्रे
यस्य पादौ क्षितिश्च ध्यातव्यो सौ सर्वभूता
नरात्मा यथा च यस्याग्निरास्यं द्यौर्मूर्धा
खं नाभिश्चरणौ क्षितिः चक्षुः सूर्यो दिशः
श्रोत्रं तस्मै लोकात्मने नमः तथा चश्रु
तिः यो विश्वचक्षुरुत विश्वतोमुखो वि
श्वतो हस्त उत विश्वतस्पात् सं बाहुभ्यां
नमते संजैर्ध्यैद्यांयावापृथिवीजनयन्दे
व एकः इति विराट्स्वरूपं स्वात्मानं ध्या
त्वा ततस्तु संध्यायी प्राणवायोर्निर्गम प्र
वेशात्मकमजपामंत्रं पंचविंश[illegible]

बा॰ प॰ ११

रंजत्वासमर्थ्यं श्रीगुरूपदिष्टमार्गेणना
दानुसंधानपूर्वकं निरस्तसमस्तोपाधि
नाकेनापिविहितालसेनप्रवर्तमानोस्मी
तिविभाव्य स्वकार्यानुष्ठानाय ॐ समुद्र
मेखलेदेविपर्वतस्तनमंडले विष्णुप
त्निनमस्तुभ्यं पादस्पर्शंक्षमस्वमे इति
भूमिंप्रार्थ्य श्वासानुसारेणतस्यांपादंनि
धाय नंदंतसाधकाःसर्वेविनश्यंतुवि
दूषकाः अवस्थाशांभवीमेस्तुप्रसन्नोस्तु
गुरुःसदा इत्यादिवदन्बहिर्गत्वा मलमू न्वं
त्रोत्सर्गंशौचाचमनेनिधाय क्लींकामदे
वायसर्वजनप्रियायनमः इतिदंतपाव
नंकुर्यात् ततोनद्यादौगत्वावैदिकस्नानं
निर्वर्त्य तांत्रिकमारभेत् यथा तत्रादौमू
लेनकरंचरणमुखानिप्रक्षाल्य ॐ मृणि
परिवज्रिणिमहाप्रान्तिसरेरत्नरत्नहुंफ

हूं स्वाहा इति शिखां बद्ध्वाचमनत्रयं कु
र्यात् मूलं आत्मतत्त्वं शोधयामि स्वाहा
मूलं विद्यातत्त्वं शोधयामि स्वाहा मूलं
शिवतत्त्वं शोधयामि स्वाहा इत्याचम्य म
लापकर्षणस्नानं विधाय पुनराचम्य
अद्यामुकमासस्येत्यादि श्रीदेवीप्रीत्य
र्थं तांत्रिकस्नानमहं करिष्ये इति संक
ल्प्य प्राणायामं कृत्वा स्वमूलऋष्यादिक
रषडंगन्यासांश्च कृत्वा स्वपुरतो जले ह
स्तमात्रं चतुरस्रं तीर्थं परिकल्प्य ब्रह्मां
डोदरतीर्थानि करैः स्पृष्टानि ते रवे तेन
सत्येन देवेशि तीर्थं देहि दिवाकर इति
सूर्यात्तीर्थं प्रार्थ्य क्रों इत्यंकुशमुद्रया सू
र्यमंडलं भित्वा गंगे च यमुने चैव गोदा
वरि सरस्वति नर्मदे सिंधु कावेरि जले
स्मिन्संनिधिं कुरु इति सूर्यमंडलात्तीर्थ

हिं

बा· मावाह्य पुरः कल्पिततीर्थे संयोज्य पुनः
प· सूर्यमंडलादेव क्रां क्रीं क्रूं क्रौं क्रः सर्वानं
१२ दमये तीर्थशक्ते प्रत्येहि स्वाहा इति तीर्थ
शक्तिमावाह्य तस्मिंस्तीर्थमंडले तां ध्याये
12 यथा ॐ सर्वानंदमयीमशेषदुरितधं
सांस्वर्णकप्रभां आत्तां चोर्ध्वकरद्वयेन द
धतीं पाशं सृणिं चक्रमान् दोर्भ्यां चामृत
पूर्णहेमकलशं स्रुक्साक्षमालां वरं गं
गासिंधुसरिद्वयादिसहितां श्रीतीर्थश
क्तिं भजे इति ध्यात्वा ॐ नमो भगवति श्र
वे श्रवालिके श्रंविके महामालिनि प्रत्ये
हि भगवति श्रशेषतीर्थालवाले ह्रीं शि श्री
वजटाधिरूढे गं गं गं गांविके स्वाहा इ
ति मंत्रेण समथाभिमंत्र्य ह्रीं इत्यालोड्य
वमित्यमृतेनेश मुद्रयामृतीकृत्य ॐ आ
त्मतत्त्वाय नमः ॐ विद्यातत्त्वाय नमः ॐ शि

वतत्वाय नमः इति तत्त्वत्रयं जले विन्यस्य
तत्र श्रीचक्रं विभाव्य तत्र स्वहृदयकमला
द्देवीमावाह्य षडंगेन सकलीकृत्य ॐ म
मुद्रया तां सावरणां स्नपयित्वा योनिमु
द्रया मूलेन तज्जलमष्टधाभिमंत्र्य तत्र
मूलमंत्रं स्मरणपूर्वकं त्रिर्निमज्ज्योन्मज्जे
त् ततः ॐ मुद्रया मूलमंत्रेण पञ्चस्वशिर
सि त्रिरभिषिंच्य मूलेन देवीं त्रिः संतर्प्य
श्रीदेवीं स्वहृदि समानीय मूलं आत्मतत्त्वं
शोधयामि स्वाहा मूलं विद्यातत्त्वं शोधया
मि स्वाहा मूलं शिवतत्त्वं शोधयामि स्वाहा
इति त्रिराचम्य तीरमारुह्य धौते वाससी
परिधाय त्रिपुंड्रकं मूर्ध्वपुंड्रकं वा तिलकं
विधाय वैदिकसंध्यां समाप्य तांत्रिकीमा
रभेत् इति स्नानविधिः अथ संध्या तत्र
पूर्ववदाचम्य मूलेन त्रिखंडां बद्ध्वा

बा॰ प॰ १३

णायामऋष्यादिकरषडंगन्यासान्विधाय
स्वपुरतोयथेनमुद्रयातथैवरचितेतीर्थज
लमस्तीकृत्य मूलेनाष्टधाभिमंत्र्य तेन
जलेन अंनमः आंनमः इंनमः ईंनमः उं
नमः ऊंनमः ऋंनमः ॠंनमः लृंनमः
ॡंनमः एंनमः ऐंनमः ओंनमः औंनमः
अंनमः अः नमः कंनमः खंनमः गंनमः
घंनमः ङंनमः चंनमः छंनमः जंनमः
झंनमः ञंनमः टंनमः ठंनमः डंनमः
ढंनमः णंनमः तंनमः थंनमः दंनमः
धंनमः नंनमः पंनमः फंनमः बंनमः
भंनमः मंनमः यंनमः रंनमः लंनमः
वंनमः शंनमः षंनमः संनमः हंनमः
क्षंनमः इत्येतैर्मातृकाक्षरैः स्वशिरः प्रोक्ष्य
मूलेनचत्रिः संप्रोक्ष्य दत्तहस्ते जलमादा
य वामेनाघ्राय लंवंरंयंहं इतिपंचभो

13

तिकमंत्रैः सप्तवारमभिमंत्र्य मूलेन त्रिवि
रभिमंत्र्य तज्जलविंदुभिर्वामहस्तकृतत
त्त्वमुद्रया मूलेन स्वशिरः त्रिः प्रोक्ष्य प्रव
शिष्टजलं वामहस्ते निधाय तेजोरूपं त
जलमिडयाकृष्य स्वदेहांतः स्थितं सक [तेनजलेन]
लकल्मषं प्रक्षाल्य तज्जलं कृष्णवर्णं पिं
गलया बहिर्निर्गतं मत्वा पुनर्दक्षहस्ते
कृत्वा वामभागे ज्वलद्वज्रशिलां ध्यात्वा
ओं ह्लीं पशु हुं फट् इति पशुपतास्त्रमंत्रेण
तस्यां शिलायामास्फाल्य मूलेन जलमा
दाय प्रवहन्नाड्या सहस्रदलपरमात्म
नैकीभूतं विभाव्य निर्गमय्य तेन जलेन
ओं अमृतमालिन्यै स्वाहा इति त्र्यंशैः स्वशि
रस्त्रिः संप्रोक्ष्य ओं आत्मतत्त्वं शोधयामि
स्वाहा ओं विद्यातत्त्वं शोधयामि स्वाहा ओं
शिवतत्त्वं शोधयामि स्वाहा ओं शिवतत्त्वं

बा॰
प॰
१४

16

शोधयामि स्वाहा ॐ विद्यातत्वं शोधयामि
स्वाहा ऐं आत्मतत्वं शोधयामि स्वाहा मूले
ॐ सर्वतत्वं शोधयामि स्वाहा इति वत्रिरा
चम्य इति जलेन नवधाचम्य जलमंजलि
नादायोत्थाय ॐ ह्रां ह्रीं ह्रूं सः श्रीमार्तण्डभै
रवाय प्रकाशशक्तिसहिताय इदमर्घ्यं प
रिकल्पयामि स्वाहा इति त्रिरर्घ्यं कुलसूर्या
य दत्वा सूर्यमंडले देवीं ध्यात्वा मानसोप
चारैः संपूज्य (प्रथमाक्षरं त्रिपुरादेवि विद्म
हे पदसुन्दरधीमहि प्रस्तीया प्रथमाक्ष
रं त्रिपुरादेवि विद्महे द्वितीयाक्षरं कामे
श्वरि धीमहि तृतीयाक्षरं तन्नः क्लिन्ने प्रचो
दयात्) ऐं प्रथमं वागीश्वरी विद्महे क्लीं द्वि
तीयं कामेश्वरि धीमहि सौः तृतीयं तन्नः
शक्तिः प्रचोदयात् अनवैयो मूलगायत्र्या
चतुरष्टसंख्या सदेव्यै सर्घ्यं सूर्यबिंबे दत्वा

ततश्चतस्रुसंध्यासुक्रमशोमूलाधार
हृदाज्ञाब्रह्मरंध्रेष्वोदेवीतेजस्समाकृष्यक
ल्पितश्रिसूर्यचंद्रतारामंडलेषुनिःक्षिप्य
तत्रबालायौवनप्रौढाविरूपांदेवींध्या
त्वा प्रथमाक्षरं त्रिपुरेदेविविद्महे
वागीश्वरिधीमहि तन्नःक्लिन्नेप्रचोदया
त् इतिप्रातः द्वितीयाक्षरं त्रिपुरेदे
विविद्महेकामेश्वरिधीमहितन्नः क्लिन्ने
प्रचोदयात् इतिमध्याह्नेतृतीयाक्षरं
त्रिपुरेदेविविद्महे श्वरिधीमहि त
न्नो न्नेप्रचोदयात् इतिसायं प्रथमा
क्षरंवागीश्वरि विद्महे द्वितीयाक्षरं
कामेश्वरिधीमहि तृतीयाक्षरंतन्नःशा
क्तिप्रचोदयात् इत्यर्धरात्रे इतिस्वस्वगाय
त्र्यर्घ्यंदत्वा यथाशक्तिजप्त्वा प्राणायाम
ऋष्यादिकरषडंगध्यानान्विधाय स्वस्व

वा॰ प॰ १५

15

गायत्रीं यथाशक्ति मूलं संजप्य मूलगा
यत्रीं च संजप्य पुनरपि प्राणायामकर
न्यासादिकं षडंगादिना जपं समर्प्य मंड
लेभ्यो देवीं तेजः स्वस्वस्थाने देवीं च हृदि
समानीय ध्यायेत् इति संध्या अथ तर्प
णं तीर्थं पूर्ववदाकल्प्य मूलेन तत्सम
स्तं यामन्तमुद्रयाऽमृतीकृत्य तत्र जले यं
त्रं ध्यात्वा तत्र देवीं हृदयात्सपरिवारामा
नीय षडंगेन सकलीकृत्य कुण्डलिन्याः
प्रयोगेनामृतेनाभिषिच्य विधिवत्सम्पू
ज्यैशान्यां ॐ ऐं ह्रीं श्रीं श्रीमच्छ्रीगुरुभै
नैरृत्यां रवस्तर्पयामि ॐ ऐं ह्रीं श्रीं वह्नौ परमगु
रुभैरवस्तर्पयामि ॐ ऐं ह्रीं श्रीं परमाचा
र्यगुरुभैरवस्तर्पयामि वायव्ये ॐ ऐं ह्रीं श्रीं
परमेष्ठिगुरुभैरवस्तर्पयामि इति त्रिःस
कृद्वा संतर्प्य ॐ ऐं ह्रीं श्रीं दिव्यौघसिद्धौ

वमानवौच गुरून्संतर्प्य इतिगुरुपर
म्परांसंतर्प्य विंदौमूलंश्रीदेवीमशिवा
सवाहनासपरिकरात्पयतो इतित्रिः
संतर्प्य परिवारदेवताःसंतर्पयेद्यथा
ह्रांहृदयंतर्पयतो पुनःप्राणायामादिवि
धायदेवींस्वहृदिविसृज्य तीर्थस्वस्थाने
विसृजेत् इतितर्पणं ततः वज्रोदकिहूं
फट्स्वाहा इत्यनेनजलकुंभंगृहीत्वा
मूलंस्मरत्यागगेहमागत्य ॐह्रींविष्णु
हसर्वपापानिशमयशोषविकल्पम
पनयहूं इत्यनेनहस्तौपादौप्रक्षाल्य
पूर्वद्वाराग्रेस्थित्वा स्वदक्षेवक्ष्यमाणक्र
मेणसामान्यार्घ्यंकृत्वा तेनजलेनद्वा
रदेवताःसंपूजयेद्यथा द्वारोर्ध्वेगंगण
पतयेनमः दक्षेवंवटुकायनमः वा
मेक्षांक्षेत्रपालायनमः अथःयांयोगि

इत्यादि

वा॰
प॰
२९

नीभ्योनमः दक्षेगंगंगायैनमः वामे यं
यमुनायैनमः पुनर्दक्षे श्रींश्रियैनमः
वामे संसरस्वत्यैनमः पुनर्दक्षेधात्रेन
मः वामेविधात्रे ऊर्ध्वेंद्वारश्रियैनमः अ
धोदेहल्यैनमः इतिसंपूज्य वामांगासं
कोचेनमंडपांतर्गत्वा तत्रनैरृते ब्रह्म
णेनमः वास्तुपुरुषायनमः इतिसंपूज्य
ईशानेभगवतिमाहेश्वरिपशुजनमन
श्चक्षुस्तिरस्करणंकुरुकुरुस्वाहा तिरस्क
रणीश्रीपादुकांपूजयामिनमः इतिसं
पूज्य अपक्रामंतुभूतानिपिशाचास्सर्व
तोदिशः सर्वेषामविरोधेनब्रह्मकर्मस
मारभे इतिदिग्बन्धनंभूतान्युत्सार्य त
तोभूमौचतुष्कोणमंडलंविधाय तत्रा
सनमास्तीर्य चतुष्कोणे ह्रींआधारशक्ति
कमलासनायनमः इतिसंपूज्य तदुप

16

रिऋष्याविष्टरंगृह्यंवादत्वाकृतांजलिः
पठेद्यथा ॐअस्यश्रीआसनशोधनमं
त्रस्य मेरुपृष्ठऋषिः सुतलंछंदः कूर्मो
देवता श्रांबीजं ह्रींशक्तिः क्रौंकीलकं
आसनारोपणेविनियोगः इतिस्मृत्वान्या
संकुर्यात् मेरुपृष्ठऋषयेनमः शिरसिसु
तलंछंदसेनमो मुखे कूर्मदेवतायेन
मोहृदि श्रांबीजायनमः गुह्ये ह्रींशक्ति
येनमः पादयोः क्रौंकीलकायनमः ना
भौ आसनारोपणेविनियोगः सर्वांगे
षु ॐ इतिविन्यस्यासनेपूजयेद्यथा ॐ मंडूका
यनमः ॐ कालाग्निरुद्रायनमः ॐ आधारश
क्तयेनमः ॐ मूलप्रकृत्यैनमः ॐ कूर्मायन
मः ॐ अनंतायनमः ॐ पृथिव्यैनमः ॐ सुधा
समुद्रायनमः ॐ मणिद्वीपायनमः ॐ चिंता
मणिगृहायनमः ॐ पारिजातायनमः ॐ र

अथकरन्यासादिन्यासः ॐ श्रांह्रींक्रौं अंगुष्ठाभ्यांनमः ॐश्रांह्रींक्रौं तर्जनीभ्यांस्वाहा ॐश्रांह्रींक्रौं मध्यमाभ्यांवषट् ॐश्रांह्रींक्रौं अनामिकाभ्यांहुं ॐश्रांह्रींक्रौं कनिष्ठकाभ्यांवौषट् ॐश्रांह्रीं क्रौं करतलकरपृष्ठाभ्यांफट् एवंहृदयादिन्यासः अथध्यानं

वा॰ प॰ १२

त्ववेदिकायनमः इतिगंधादिनाकुशावि
ष्टरंसंपूज्य तदुपरिवीरासनेनोपवि
श्य ॐपृथ्वित्वयाधृतालोकादेवित्वंविष्णु
नाधृता त्वंचधारयमांदेविपवित्रंकुरुचा
सनं ॐह्रींपृथिव्यैनमः इतिपठित्वा संविदं
यथामंत्रंस्वीकुर्यात् तद्विधिर्यथा ॐसं
विदेब्रह्मसंभूतेब्रह्मपुत्रिसदानघे ब्रा
ह्मणानांचतृप्त्यर्थंपवित्राभवसर्वदा
ॐब्राह्मण्यैनमः स्वाहा सिद्धमूलस्वरूपेदे
विहीनबोधप्रबोधिनि राजप्रजावशं
कारिशत्रुपक्षनिसूदिनि ऐंक्षत्रियायै
नमः स्वाहा अज्ञानेंधनदीप्ताग्नेज्ञानाग्नि
ब्रह्मरूपिणि आनंदस्याहुतिंप्रीतिंसम्य
कज्ञानंप्रयच्छमे क्लींवैश्यायैनमः स्वा
हा नमस्यामिनमस्यामियोगमार्गप्रद
र्शिनि त्रैलोक्यविजयेमातःसमाधिफ

लदाभव क्लींसिद्धायैनमः स्वाहा इत्यभि
मंत्र्य अमृतेअमृतोद्भवे अमृतवर्षिणि
अमृतमाकर्षय २ सिद्धिंदेहि २ अमुक
देवीपदंमेवशमानय २ आगच्छ २ संति
ष्ठ २ संनिधेहि २ संनिरुध्यस्व २ संमुखी
भव २ अवगुंठययोनिप्रदर्शयेत्तिनउपरि
समयामूलेजप्त्वा धेनुमुद्रयामृतीकृत्य
इत्यावाहनादिमुद्राः संदर्श्य छोटिकाभिः
दशदिग्बंधंविधाय श्रीगुरुपादुकामंत्रे
णशिरसि श्रीगुरुंत्रियासंतर्प्य मूलेन
स्फुरिदेवींसमयासंतर्प्य ऐंवदवदवाग्वा
दिनिममजिह्वाग्रेस्थिरीभवसर्वसत्ववं
शंकरिस्वाहा इत्यनेनमुखेतत्वमुद्रया
जुहुयात् ततआनंदोमयोभूत्वा रक्तवस
नाद्यलंकृतः शिवोहमितिभावयन् श्री
चक्रेश्वरतः स्वाणीसनेसंस्थाप्य मूलेन

बा॰ प॰ २८

18

पुष्पांजलिनाच्छाद्य प्रणम्य मूलेन पूजोप
करणमभिमंत्र्य सव्यहस्ते गंधपुष्पादिकं
निधाय वामे हस्ते गंधजलं कुंभे निधाय दे
वतायाः पश्चिमे द्रव्याणि निधाय वक्ष्यमा
णक्रमेण सामान्यार्घोदकेन पुष्पादिकं
प्रोक्षयेत् यथा ॐ स्नानाभिषेके स्नानाभिषे
केहुं फट् स्वाहा ॐ पुष्पकेतुराजार्हते स नेशानाय
मयक्षेत्रवर्द्धाय हुं पुष्पे पुष्पे महापुष्पे सु
पुष्पे पुष्पसंभवे पुष्पचयावकीर्णे हुं
फट् स्वाहा इति पुष्पाभिमंत्रणं ह्रां हुं फट्
स्मरजाराचमुद्रया दिव्यदृष्ट्या च पुष्पादि
कं च पुनर्विलोक्य वामभागस्थं जलपू
र्णकुंभं श्रामिति वामहस्तेन स्पृष्ट्वा ह्रीं इ
ति दक्षकराग्रेण तत्स्थं जलं च स्पृष्ट्वा रं उ
ति क्षिप्त दीपशिखां वा धूपं च स्पृष्ट्वा गंधादिकं
मूलेनाभिमंत्र्य करौ प्रक्षाल्य वामे पंच

रुभ्योनमः दक्षेगंगणपतयेनमः श्र
ग्रेमूलदेवतायैनमः इतिप्रणम्य मूर्धि
संचहृमुद्रां विधाय गुरुमंत्रेणगुरुपा
दुकांस्वशिरसिविन्यस्य पुनस्तेनैवगं
धादिनासंपूज्यगंधादिमुद्राः प्रदर्श्य
नमोस्तुगुरवेतस्मायिष्टदेवस्वरूपिणे
यस्यवागमृतंहंतिविषंसंसारसंज्ञकं
इतिनमस्कारमुद्रयाप्रणम्य ॐऐंह्रींश्रीं
श्रंश्रांसौः इतिकरशुद्धिविधया कराव
न्योन्यमर्दनेनसंशोध्य ॐऐंह्रींश्रींश्रंन
मः मध्यमयोः ॐऐंह्रींश्रींश्रांनमः अना
मयोः ॐऐंह्रींश्रींसौंनमः कनिष्ठयोः
ॐऐंह्रींश्रींश्रंनमः अंगुष्ठयोः ॐऐंह्रीं
श्रींश्रांनमः तर्जन्योः ॐऐंह्रींश्रींसौंन
मः करतलपृष्ठयोः इतिविन्यस्य मूल
नमोबालेत्रिपुरेमांरक्षरक्ष इतिमूर्धादि

बा॰ पाहंतंत्रिर्व्यापकंविन्यस्य ओंअपसर्पं
प॰ न्तुतेभूतायेभूताभुविसंस्थिताः येभू
२५ ताविघ्नकर्तारस्तेनश्यंतुशिवाज्ञया
पाखंडकारिणोभूताभूताभूम्यंतरि
क्षगाः दिव्यलोकेस्थितायेचतेनश्यंतु
शिवाज्ञया इतितर्जनीमध्यमाभ्यामू
र्ध्वोर्ध्वंतालत्रयदानेन वामपार्ष्णिघात
त्रयेणदिव्यदृष्ट्याचत्रिविधविघ्नानु
त्सार्य छोटिकाभिर्दशदिग्बंधंविधाय
चतुर्दिक्षुवह्निप्राकारंसंचिंत्य एवंव
प्राणायामत्रयंकुर्यात् तद्यथा इड
यापिबषोडशभिः पवनंकुंभषष्टिच
तुःषष्ट्यमेतरांगं त्यजपिंगलयाशन
कैः शनकैर्दशभिर्दशभिर्दशभिर्द्वाधि
कैः इत्येकःप्राणायामः एवमपरविप
र्ययेनकृतोद्वितीयः प्रथमवत्तृतीय

इत्थं प्राणायामेन निरस्तसकलकल्म
षे स्वशरीरं विचिन्त्य भूतशुद्धिं कुर्यात्
तत्र पादादिजानुपर्यन्ते पृथिवीस्थाने
चतुरस्रे वज्रलांछिते पीतवर्णे ब्रह्म
दैवते निवृत्तिकलाधिष्ठिते लं बीजयु
ते ध्यात्वा जान्वादिनाभिपर्यन्तमपांस्था
ने शुक्लवर्णे अर्धचन्द्राकारे भृंगद्वयेपि
पद्मलांछिते विष्णुदैवते प्रतिष्ठाकला
धिष्ठिते वंबीजयुते ध्यात्वा नाभ्यादिकं
ठपर्यन्ते वह्निमंडले स्वस्तिकोपेते त्रि
कोणाकारे रक्तवर्णे रुद्रदैवते विद्याक
लाधिष्ठिते रंबीजयुते ध्यात्वा कंठादि
भ्रूमध्यपर्यन्ते वायुमंडले षट्कोणाका
रे षट्बिंदुलांछिते हंसोपेते मीश्वर
दैवते शांतिकलाधिष्ठिते यंबीजयुते
ध्यात्वा भ्रूमध्यादिब्रह्मरंध्रांतमाकाश

बा॰ पं॰ र॰ 20

स्थानेहंसाकारेध्वजलांछिते धूम्रवर्णे
सदाशिवदैवते शान्त्यतीताकलाधिष्ठि
ते हंबीजयुतेध्यात्वा तत्रपंचभूतयेदे
हेधर्मकंदसमुद्भूते ज्ञाननालकमैश्व
र्याष्टदलोपेते परवैराग्यकर्णिकेस्वरू
दयारविंदंध्यात्वा तत्कर्णिकायांजीवा
त्मानं मायाग्रमात्रंप्रदीपकलिकाभास्व
रं अनादिसत्तासंछिन्नपरचिद्रूपंसंचि
म प्रागुक्तक्रमेणमूलाधारात्कुंडलि
नीमुत्थाप्य सुषुम्णावर्त्मनामूलाधारा
त धनाहतचक्रस्थवर्णाधिदेवताग्रसंनी वर्ण
हृदयकमलमानीय तयाकुंडलिन्या
कवलीकृतंजीवात्मानंध्यायन्सुषुम्णा
वर्त्मनाविशुद्ध्यादिचक्रस्थवर्णाधिदेव वर्ण
ताग्रसंनींब्रह्मरंध्रंनीत्वा तत्रस्थितस
हस्रदलकमलकर्णिकामध्यवर्तिनि

परमात्म ज्योतिषि सर्वगणे वर्णादि दे
वताकं देवकं जीवात्मा ने हंस इति मे
त्रेण संयोज्य कुंडलिनी स्वस्थान मानी
य तत्व संहारं कुर्यात् तत्र पृथ्वी स्था
ने पादेंद्रिय गमन क्रिया गंध गुण
यत्राण पृथिवी ब्रह्म निवृत्ति समान
वायूंस्तत्पद्मं ब्रह्मणे पृथिव्याधिप
तये निवृत्ति कलात्मने हुं फट् स्वाहा
इति मंत्रेण तान् सर्वान् कुंडलिनी द्वारा धो
मध्ये संहरेत् ततो पां स्थाने हस्त दान
दान व्यापार रसना जल विष्णु प्रतिष्ठो
दानान् संस्तत्प ॐ ह्रीं विष्णवे प्रतिष्ठा क
लात्मने हुं फट् स्वाहा इति तान् सर्वान् कुं
डलिनी द्वारा वह्नि मध्ये संहरेत् ततो
वह्नि स्थाने पायु विसर्ग विसर्जनीय
रूप चक्षु वह्नि रुद्र विद्या व्यानान् संस्त

कला

वा॰
प॰
२१

20

त्य ॐ ह्रूं रुद्राय तेजोधिपतये विद्यात्मने
हुं फट् स्वाहा इति तान्सर्वान्वायुमंडले
संहरेत् ततो वायुस्थाने ऽपस्थाने त्व
ग्विषयस्य स्पर्शस्य हस्तवायोरीश्वरशांत्यया
नान्संस्मृत्य ॐ ह्रैं ईश्वराय वाय्वधिपत
येशांतिकलात्मने हुं फट् स्वाहा इति ता
न्सर्वानाकाशस्थाने संहरेत् तत्राकाश
स्थाने वाग्वचनवक्तव्यशब्दश्रोत्राका
शसदाशिवशांत्यतीतानां प्राणान्संस्मृत्य
ॐ ह्रौं सदाशिवायाकाशाधिपतयेशां
त्यतीताकलात्मने हुं फट् स्वाहा इति
तान्सर्वान्कुंडलिन्यां संहृत्य तां बिंदुश
क्तौ बिंदुशक्तिं नादशक्तौ प्रणवेण संह तां परम शक्तौ
त्य ॐ ह्रीं फट् स्वाहा इति परमशक्तिं शू
वौंक परमात्मने संयोज्य केवलशरी
रे वामकुक्षिस्थितं पापपुरुषं कज्जल

प्रभं ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुज
द्वयं सुरापानहृदायुक्तं गुरुतल्पकटि
द्वयं तत्संसर्गपदद्वंद्वमंगप्रत्यंगपात
कं उपपातकरोमाणं रक्तश्मश्रुविलो
चनं खड्गचर्मधरं कृष्णं पापं कुक्षौ विचिं
तयेत् इति पापपुरुषं विचिंत्य वामना
सारंध्रेण प्राणायामविधिना यंबीजेन
सह वायुमापूर्य नाभिस्थषट्कोणाका
रे वायुमंडले संयोज्य तत्र यमिति वायुबी
जे कृष्णवर्णं संचिंत्य कुंभकेन यमिति
वायुबीजमावर्तयेत् तदुत्थितेन महा
वायुना स्वपापपुरुषं स्वदेहस्थं संशोष्य
वायुं दक्षिणनासया विरेच्य पुनर्दक्षिण
नासापुटेन रंबीजेन सह वायुमापूर्य
मूलाधारे संयोज्य तत्रस्थवह्निमंडले
रमिति वह्निबीजे रक्तवर्णं विचिंत्य कुं

भकेनरमितिवीजमावर्तयंस्तदुत्थितेनम
बा॰ हावह्निना स्वपापपुरुषंस्वशरीरस्थं
प॰ संदह्य पापपुरुषभस्मनासहितंवायुं
२२ वामनासयाविरेच्य पुनर्वामनासयावं
22
वीजेनसहवायुमापूर्य ब्रह्मरंध्रेसंयोज्य
तत्रस्थचिच्चंद्रमंडलेवमित्यमृतवीजं
शुक्लवर्णंविचिंत्य कुंभकेनवंवीजमा
वर्तयंस्तत्रस्थितामृतधारयास्वदेहभ
स्मप्लुतंविभाव्य तंवायुंदक्षिणनासया
विरेच्य पुनर्दक्षिणनासयालंवीजेनवा
युमापूर्य मूलाधारस्थपार्थिवमंडले
संयोज्य तत्रलमितिपृथ्वीवीजंपीत
वर्णंविचिंत्य कुंभकेनलंवीजमावर्त
त यंस्तडृढंतैजसामृतलावितंभस्मघ
नीकृत्य तंवायुंवामनासयाविरेच्य पु
नर्वामनासायांमायावीजेनवायुमापू

यं मूलाधारस्य बिंदुमध्ये मायाबीजं स्फु
रद्बालार्कवर्णं विचिंत्य कुंभकेन माया
बीजमावर्तयेत्तेन करणाद्यवयवस चर
मेतं स्वदेहं निष्पापं विभाव्य ततो द
क्षिणनासया रेचयेत् अन्यदेहं निष्पन्नं
विभाव्य सोहमिति मंत्रेण ब्रह्मरंध्रस्य
परमात्मनः सकाशात्कुंडलिनीमुत्थाप्य
आज्ञाचक्रादिक्रमेण तानि तानि भूतानि
च स्वे स्वे स्थाने स्थापयन् स्वस्थाने मूलाधारे सं
स्थापयेत् इति भूतशुद्धिः ततः स्वशरीरं
निरस्तसकलकल्मषं देवनारायणयोग्यं
तेजोरूपं विभाव्य प्राणप्रतिष्ठां कुर्यात् य
था हृदि हस्तं निधाय ॐ अस्य श्रीप्राण
प्रतिष्ठामंत्रस्य ब्रह्मा विष्णुमहेश्वरा ऋ
षयः ऋग्यजुःसामानि छंदांसि प
राप्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः

बा॰
प॰
२३

ॐ कीलकं मम श्रीबालात्रिपुरसुंदरी
गसिद्ध्यर्थं प्राणप्रतिष्ठार्थे विनि
योगः ऋष्यादिन्यासः ब्रह्म विष्णु
शिवऋषिभ्यो नमः शिरसि ऋग्यजुः
सामछंदेभ्यो नमो मुखे पराप्रा
णशक्तिर्देवतायै नमो हृदि क्रों बीजा
य नमो गुह्ये ह्रीं शक्तये नमः पादयोः
क्रौं कीलकाय नमः नाभौ मम मोक्षा
र्थे विनियोगः नमः सर्वांगेषु
ॐ क्रों ह्रीं क्रौं यं रं लं वं शं षं सं हं ह्रौं हंसः
सोहं मम श्रीबालात्रिपुरायाः प्राणा इह
प्राणाः जीव इह स्थितः सर्वेंद्रिया
णि इह स्थितानि वाङ्मनस्त्वक्चक्षुः
श्रोत्रघ्राणा इहागत्य सुखं चिरं तिष्ठंतु
स्वाहा इति प्राणप्रतिष्ठां विधाय ॐ अ
स्य श्रीबालात्रिपुरसुंदरीमंत्रस्य श्री

दक्षिणामूर्त्तिऋषिः पंक्तिछंदः श्रीबा
लात्रिपुरादेवता ऐंबीजं सौंशक्तिः क्लीं
कीलकं ममश्रीधर्मार्थकाममोक्षार्थे
पूजनेविनियोगः दक्षिणामूर्त्तिऋषये
नमः शिरसि पंक्तिछंदसेनमः मुखे
श्रीबालात्रिपुरायैनमः हृदये ऐंबीजा
यनमो गुह्ये सौंशक्तयेनमःपादे क्लीं योः
कीलकायनमः नाभौ पूजनेविनि
योगः सर्वांगे मूलमंत्रेणऋष्यादि
करषडंगन्यासा सर्वदाहि पाद प्रवन
ऐंनमः नाभ्यादिपादांतं द्वितीये क्लीं
नमः कंठादिनाभ्यंतं तृतीये सौः नमः
मूर्धादिकंठांतं ऐंनमः वामपाणित
ले क्लींनमः दक्षे सौंःनमः उभयोः
इतिव्यापकंन्यासः ऐंनमः दक्षकर्णे
क्लींनमः वामे सौंःनमः चिबुके ऐंन

बा॰
प॰
२४

मः दक्षशंखे क्लींनमः वामे सौंःनमः
मुखे ऐंनमः दक्षनेत्रे क्लींनमः वामे
सौंःनमः नासिकायां ऐंनमः दक्षांसे
क्लींनमः वामे सौंःनमः जठरे ऐंनमः
दक्षकूर्परे क्लींनमः वामे सौंःनमः
ऊर्वो ऐंनमः दक्षजानुनि क्लींनमः
वामे सौंःनमः ध्वजमूर्ध्नि ऐंनमः दक्ष
पादे क्लींनमः वामे सौंनमः गुह्ये ऐंन
मः दक्षपार्श्वे क्लींनमः वामे सौंनमः
हृदंबुजे ऐंनमः दक्षस्तने क्लींनमः वा
मे सौंनमः कंठे इतिनवयोनिन्यासः
अथ ... रत्न्यादिन्यासः ऐंरतयेनमः मू
लाधारे क्लींमनोभवायैनमः भ्रूमध्ये
सौंः ... प्रीत्यैनमः हृदि सौंअ... स्मरनिषेप
नमः भ्रूमध्ये क्लींयोगीश्वैनमः हृदि
ऐंविश्वयोन्यैनमः मूलाधारेमूर्ध्नि ह्सौं

ईशानायनमः ह्स्त्रीमनोभवायनमः व
क्रे ह्स्त्रेंतत्पुरुषाय पेंमकरध्वजाय हृदि
ह्स्त्रूंअघोराय ह्लूंकन्दर्पायनमः गुह्ये ह्स्त्रिं
वामदेवाय ह्रींमन्मथायनमः पादयोः
ह्स्त्रः सद्योजाताय ह्लींकामदेवायनमः
मूर्ध्नि ह्स्त्रौंईशानायनमः ह्स्त्रेंतत्पुरुषा
यनमः पूर्वे ह्स्त्रूंअघोरायनमः दक्षिणे
ह्स्त्रिंवामदेवायनमः उत्तरे ह्स्त्रःसद्योजा
तायनमः पश्चिमवक्त्रे पूर्ववत्षडंगोवि
धाय ह्स्त्रंसकलह्रां ह्स्त्रंहृदयायनमः
ह्स्त्रांहसकलह्रीं ह्स्त्रेंशिरसेस्वाहा ह्स्त्रेंह
सकलह्रौं ह्स्त्रूंनेत्रत्रयायवषट् ह्स्त्रेंह
सकलह्रैं ह्स्त्रेंकवचायहुं ह्स्त्रांहसकल
ह्रों ह्स्त्रूंनेत्रत्रयायवषट् ह्स्त्रेंहसकलह्रः
ह्स्त्रेंअस्त्रायफट् इतिषडंगः ह्रांक्षोभण
बाणायनमः अगुह्ययोः ह्रींद्रावणबा

बा॰ णायनमः तर्जन्योः क्लींआकर्षणवाणा
प॰ यनमः मध्यमयोः ब्लूंवशीकरणवाणा
२५ यनमः अनामयोः सःउन्मादनवाणायन
मः कनिष्ठयोः इतिवाणन्यासः ॐकामा
यनमः अंगुष्ठयोः क्लींमन्मथायनमः त
८ र्जन्योः ऐंकंदर्पायनमः मध्यमयोः ब्लूंमकर
ध्वजायनमः अनामयोः स्त्रींमीनकेतवे
नमः कनिष्ठयोः इतिकामन्यासः ह्रींद्रा
विण्यैनमः मूर्ध्नि ह्रींक्षोभिण्यैनमः पाद
योः क्लींवशीकरिण्यैनमः मुखे ब्लूंआक
र्षिण्यैनमः गुह्ये सःसंमोहिन्यैनमः हृ
दि ऐंभगायनमः भाले क्लींभगायै
नमः भ्रूमध्ये ब्लूंभगसर्पिण्यैनमः मु
खे स्त्रींभगमालिन्यैनमः चंदिकायां सः
अनंगायैनमः कंठे ऐंअनंगमथनायै
नमः हृदि क्लींअनंगमेखलायैनमः

नाभौ ह्रूं अनंगमदनायै नमः स्वाधिष्ठाने
इति सुभगादिन्यासः अथ मातृकान्यासः
यथा शिरसि अं नमः भाले आं नमः भ्रु
वोः इं ईं नमः कर्णयोः उं ऊं नमः नेत्रयोः
ऋं ॠं नमः नासि लृं नमः गंडयोः ॡं न
मः ओष्ठयोः ओं औं दंतपंक्त्योः अं नमः मु
खे अः नमः चिबुके कं नमः गले खं नमः
कंठे गं नमः पार्श्वयोः घं ङं नमः स्तन
योः चं छं मूलयोः जं झं नमः ऊर्परयोः
ञं टं नमः पाण्योः ठं डं नमः करतलपृष्ठ
योः ढं णं नमः नाभौ तं नमः गुह्ये थं ऊ
र्वोः दं धं नमः जान्वोः नं पं नमः जंघ
योः फं बं नमः ग्रंथिस्थानयोः भं मं नमः
पादतलयोः यं रं नमः चरणाग्रतलयोः लं
वं नमः कक्षा शं षं नमः कर्णयोः सं न
मः गंडयोः हं नमः मौलौ ळं क्षं नमः सू

बा॰ देवस्यडंगन्यासं कुर्यात् मातृकान्यासं
कलाविद्यारागकालनियतिपुरुषप्रकृ
तिबुद्ध्यहंकारमनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्रा
णवाक्पाणिपादपायूपस्थशब्दस्पर्शरूप
रसगंधाकाशवाय्वग्निसलिलपृथिव्यात्म
कंशुद्धमिश्राशुद्धषट्त्रिंशत्तत्त्वसहितं
ॐवालामूलविद्यांवोच्चार्य सर्वतत्त्वस्थूल
सूक्ष्मपराख्यदेहत्रयाभिमानिनंजीवात्मा
नंशोधयामिस्वाहा इतित्रुलकचक्रहृदयेस्वी
कृत्य ततःशक्तिपात्रस्थेनोल्प बलिपात्रमि
दंतत्प्रदत्तंस्वाधिष्ठितंमया स्वीकृत्यसम
गोदेविद्यशोविद्योचदेहिमे इतिपठंशक्ति
येदद्यात् ततःस्वपात्रेकपालिनीमुद्रि

तेनवामकरेणगृहीत्वा स्वगुरुमार्गेण।
सामयिकैः सहपात्रवन्दनंकुर्यात् यथा ॐश्री
मद्भैरवशेखरप्रविलसच्चन्द्रामृतप्लावि
तंक्षेत्राधीश्वरयोगिनीगणमहासिद्धैः
समाराधितं आनन्दार्णवमहात्मकमि
दं साक्षात्त्रिखण्डात्मकंवन्देश्रीप्रथमंकरा
म्बुजगतंपात्रंविशुद्धिप्रदम् । इत्यभिवन्द्य
वन्दनं जुहोमि इतिगुरुशक्तिसाधकेभ्य
श्चाज्ञांगृह्णीयात् तेचयथोचितंजुषस्वजु
षध्वमितिब्रूयुः ततोमूलाधारात्कुण्डलि
नीमिष्टदेवतास्वरूपांजिह्वान्तेविभाव्य मा
ॐआत्मतत्त्वंशोधयामिस्वाहा इतिकुण्ड
लिनीमुखेजुहुयात् ॐहैमंसिन्धुरसा
वहं दयितयादत्तंचपेयादिभिः किंचिद्
बलरक्तपंकजदृशासानन्दमुद्घीलितम्
वामेस्वादुविशुद्धशुद्धिशकलंपाणौविधा

बा॰ यात्मकेवन्दे पात्रमहं हृहितीयमथुनानन्दैक
प॰ संवर्धनम् विद्यातत्त्वं शोधयामिस्वाहा २ ॐ
५५ सर्वाम्नायकलाकलापकलितं कौलहलो
यीनितं चन्द्रोपेन्द्रमहेन्द्रशंभुवरुणब्रह्मा
दिभिः सेवितम् ध्यानं देवगणैः परं मुनि
वरैर्मोक्षार्थिभिः सर्वदा वन्दे पात्रमहं तृती
यमथुनास्वात्मावबोधप्रदं शिवतत्त्वं शो
धयामिस्वाहा ३ ॐ मध्येमीनरसावहं हरि
हरब्रह्मादिभिः पूरितं मुद्रामैथुनथर्मक
र्मनिरतं तारामनेकाश्रयम् श्रीवायी
चितमष्टभैरवकलान्यासेन वाञ्छादितं
पायात्पंचमकारतत्त्वनिलयं पात्रं चतुर्थं
नमः प्रकृतितत्त्वं शोधयामिस्वाहा ४ श्री
धारेभुजगाधिराजवलये पात्रे महीमंड
लेमध्येमममसमुद्रवारिपिशितं वाष्टौव
रिष्ठान्तिनः सोऽहं भैरवमर्चयन्प्रतिदिनं

नानागणैरसंख्यैरादित्यप्रमुखैः सुरासुर
गणैराज्ञाकरैः किंकरैः प्रसन्नस्तं त्वं प्रीणयामि
स्वाहा ५ छत्रं चामरभद्रपीठपरमानन्दोदयादायकं वाजीदन्ति मनोहरं सुखकरं साम्राज्यसाम्राज्यपदम् नानाव्याधिमवान्यकारहरणं जन्मान्तरध्वंसनं श्रीमद्भैरवभैरवीप्रियतरं पात्रं च षष्ठं नुमः मनस्तं त्वं प्रीणयामि स्वाहा ६ जायत्स्वप्नसुषुप्तिबोधपवने चैतन्यमात्रप्रदं विद्युद्भास्करवह्निचन्द्रयतुर्षीज्योति निष्कलाव्यापिते वामापिंगलमध्यगाविवलयामकुंडलीबोधिंगं पात्रं सप्तम पूरणेनन्तकरुणानन्दप्रदं पातु मां बुद्धिस्तं त्वं प्रीणयामि स्वाहा ७ ॐ खड्गापाडुकमं जलं सुतिलकं कण्ठे हिमारस्तनं शात्रोवीगवलशीर्षिकायं हरणं देहस्थिते: कारणम् वांछा

बा॰
प॰
५८

सिद्धिकरं मनःस्थितिकरं मा कर्षणं योषितां
पात्रे चाष्टममष्टसिद्धिकरणं षोडश मन्त्रे
भजे अहंकारतत्त्वं शोधयामि स्वाहा ८ ॐ
सर्वानन्दकरं सदाशिवपदं सर्वार्थसम्प
त्प्रदं साम्राज्यार्थिकरं समस्तसुखदं चाज्ञा
नविध्वंसनम् आयुःकांतियशो विवर्धन
करं संसारमोहच्छिदं पात्रे लक्ष्यगुणात्मके
च नवमं षोडशतापं भजे शक्तितत्त्वं शो
धयामि स्वाहा ९ ॐ ब्रह्मविष्णुमहेशानां
देवानां च विशेषितः दुर्लभं पावनं पात्रे
दशमं प्रणमाम्यहम् भैरवतत्त्वं शोध
यामि स्वाहा १० ॐ पापघ्नं शांतिशुभदं दि
व्यं स्वादु सुखालयम् पात्रमेकादशं व
न्देऽशुभं सेवासुखागतम् ११ सर्वतत्त्वं शो
धयामि स्वाहा इति पात्रवन्दनम् अथ
पात्रप्रशंसा पात्रे कृत्वा करे मंत्री सर्वक

मेलभैरवी इहलोके श्रियं भुक्त्वा देहा
न्ते भैरवी भवेत् १ ॐ देहस्थाखिलदेवता
गजमुखाः देव्यापि या भैरवा योगिन्यो व
टुकश्च यक्षापितरः पैशाचकाश्चेटकाः
अन्ये भूचरखेचराः प्रतिपगा वेतालभू
तग्रहास्तस्माः सुः ऊलपत्रकस्यापिवतः
पानेमदीपं चक्रम् २ वामे रामारमणाकु
शलादक्षिणे बालिपात्रमग्रे मुद्रास्वणा
कवटको सूकरस्यामशुद्धिः स्पेवीणा
मरसमधुरामद्धरुः सत्कथायां कौलेमा
गः परमगहनो योगिनामप्यगम्यः ३ श्री
लिपिशितपरस्त्रीभोगपूजापरोहं वद्ध
विधकुलमार्गारंभसंभाविनोहं पशुज
नविमुखोहं भैरवीमाश्रितोहं गुरुचरण
रतोहं भैरवोहं शिवोहम् सकलविकल
सज्ञानित्यपदनानंतरोहं जननमरणदुःखा

बा॰
प॰
५७

तीतभावः सदाहम् परमविमलनित्यान
न्दबोधान्वितोहं गुरुचरणरतोहं भैरवोहं
शिवोहं ७ सकलविबुधदीक्षामंत्रमुद्रा
त्मकोहं विविधविबुधवर्ग्यार्थमार्गोन्मु
खोहम् विमलतररतरोहं सुन्दरीतत्परोहं
गुरुचरणरतोहं भैरवोहं शिवोहं ८ सह
जपदपरोहं पूज्यपूजात्मकोहं बहलसु
खमयोहं सच्चिदानन्दितोहम् शिवशर
णगतोहं भक्तलोकार्चितोहं गुरुचरणर
तोहं भैरवोहं शिवोहं शिवोहं शक्तिरूपो
हं देवोहं दनुजोप्यहं यक्षोहं मनुजश्चाहं
सर्वोहं सर्वदाप्यहं मंत्रोहं मंत्रकल्पोहं
मंत्रजाप्यहमेव च मंत्रकृन्मंत्रविद्याहं मे
त्रानन्दात्मकोप्यहं पूजाहं पूज्यरूपोहं पू
जकोप्यहमेव च पूजाकर्म्मास्मि पूजाविस्तृ
जारसमयोप्यहं ९ करे पात्रं मुखे स्तोत्रमा

नन्दोऽहं दयान्तरे भक्तिर्गुरुपदांभोजे धार
णं किमतः परम् ११ एकेन शुष्कवटकेन
चर्वे पिबामि वापीं पिबामि सहसालव
णार्द्रकेन ग्रासाय मां ममलिरोहितम
स्य खण्डं गंगां पिबामि यमुनां सहसाग
रेण १२ वामे चन्द्रमुखी मुखे च मदिरापा
त्रं कराम्भोरुहे मूर्ध्नि श्रीगुरुचिन्तनं भग
वती ध्यानास्पदं मानसम् जिह्वायां जप
साधनं परिणतिः कौलक्रमाभ्यामने ये या
सन्तो नियतं पिबन्ति सरसं ते भुक्तिमुक्ती
गताः १३ पीत्वा पीत्वा पुनः पीत्वा यावत्प
तति भूतले उत्थाय च पुनः पीत्वा पुनर्ज
न्म न विद्यते [illegible] धर्माधर्महवि
र्दीप्ते स्वात्माग्नौ मनसा स्रुचा सुषुम्णाव
र्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं प्रकाशा
काशहस्ताभ्यामवलम्ब्योन्मनीस्रुचं

बा॰
प॰
५८
58

यमीयमिकलास्तेहस्तर्गिवक्रौञ्जहोम्यहं
यावन्नचलतेदृष्टिर्यावन्नचलतेमनः
तावत्पानेप्रकर्तव्यंपशुपानमतःपरं
एवंपात्रवंदनंकृत्वा ततःपूर्वस्थापितव
लिपात्रस्यापिनमन्त्रादिकमेकास्मिन्पात्रे
कृत्वा सोदकपात्रहस्तः पूजागृहाद्बहि
र्गत्वा जलेनसुचौदेशेचतुरस्रहस्तत्रिको
णात्मकंमंडलंकृत्वा देविपूर्ववत् तत्र
गदादिडमरुपात्रहस्तं त्रिलोचनंकृष्णा
मंभैरवंदेवंसर्वविघ्नविनाशनं वामाधः
करमारभ्यवामोर्ध्वकरपर्यंतमाशुयथा
ने श्रुच्छिष्टभैरवंध्यात्वा गंधादिभिःसं
पूज्य ॐऐंह्रींश्रींउच्छिष्टभैरवएह्येहिब
लिंगृह्णहुंफट्स्वाहा इतिमंत्रेणानस्मि
न्मंडलेपात्रस्थवलिद्रव्यंविसृज्य तत्पा
त्रेहस्तौपादौचप्रक्षाल्याचम्य तत्पात्रं

प्रक्षाल्य

स्वात्मानंदी तं श्रीभिषिंचत्पूर्णांति स्वात्मवीरवंदन
लोकेच

लेनप्रत्यर्थं स्वजागृहद्वारं गत्वा उदयो
स्त्विति ब्रुवन् अंतः प्रविश्य स्वासने उ
पविश्य तस्मात्पात्रस्थजले विशेषार्घ्यजल
बिंदुं ध्यात्वा तेन [illegible] जले विशेषार्घ्यं ज
[illegible] पटेन श्रीवामकेश्वरतंत्रे ॐ नत्वा पंत
प्रेन ह्रूष्कोडान पूपंत हूं खकाननाः साथ
कानोशिवाः सत्त्वाम्नायपरिपालिनो
१ जयंतु मातरः सर्वा जयंतु योगिनीग
णाः जयंतु सिद्धडाकिन्यो जयंतु गुरुपं
क्तयः नंदंतु सिद्धानंदस्त्वभैरवादयः नं त्रातिमा
दंतु देवताः सर्वाः सिद्धविद्याधरादयः २
ये चाम्नायविशुद्धात्मा मंत्रिणः शुद्धबुद्ध
यः सर्वदानंदहृदयानंदंतु मम भक्ति
तः ३ नक्षत्राणि ग्रहा योगाः करणाश्च त
था परे सर्वे ते ह्यविनो यांतु मासाश्च ति
थयस्तथा ४ तृप्यंतु पितरः सर्वे रुद्र

वीवत्सरादयः भूचराःखेचराश्चैवतुष्यं
बा॰ तुममभक्तितः ८ अंतरिक्षचरायेचये
प॰ चान्येदेवयोनयः सर्वेतेसुखिनोयांतु
५५ 59 सर्वानियाश्चपाहिताः ७ पशावस्तावश्चै
वपर्वताःकंधराग्रहाः ऋषयोब्राह्मणाः
सर्वेषांशांतिंकुर्वंतुमेसदा ८ तीर्थानिपश
वोगावोयेचान्येपुण्यभूमयः वृक्षाःप
तिव्रतानार्यःशिवंकुर्वंतुमेसदा ९ शि
वंसर्वत्रमेचास्तुपुत्रदारधनादिषु राजा
नःसुखिनःसंतुतेममार्गोस्तुमेसदा १०
शुभामेदिवसायांतुमेज्ञातिश्लिष्टंतुमेशिवाः
साधकाजयिनःसंतुशिवातिष्ठंतुपूजकाः
११ द्वेष्टारःसाधकानांचसदेवाम्नायदूषकाः
डाकिनीनांसुखेयांतुसर्वास्तापिशनेस्वतः
शत्रवोनाशमायांतुममनिंदाकराश्चये द्वे
ष्टारःसाधकानांचविनश्यंतुशिवाज्ञया १२

येनिंदकास्तेविलयंप्रयांतुयेसाधकास्ते
प्रभवंतुसिद्धाः सर्वत्रदेवीकरुणावलो
काद्गुरुःपरेश्रीममसंनिधत्तां १४ इतिशा
तिस्तोत्रंपठित्वाअन्यप्रकारेणापिलि
ख्यते श्रीभैरवः ॐदेविवक्ष्यामिपूजांते
शांतिस्तोत्रमनुत्तमं वीरायेनपरानंद
पदंप्राप्स्यन्यनामयं १ योगिनीचक्रमध्य
स्थंमातृमंडलवेष्टितं नमामिशिरसानाथं
भैरवभैरवीप्रियं २ अनादिघोरसंसार
व्याधिध्वंसैकहेतवे नमःश्रीनाथवैद्याय
कुलौघपथप्रदायिने आपदोड्डरितेरोगाः
समयाचारलंघनात् येसर्वेतेव्यपोहंतु
दिव्यचक्रस्यमेलनात् आयुरारोग्यमैश्व
र्यंकीर्तिलाभःसदाजयः कांतिर्मनोरथ
प्राप्तिर्यांतुसर्वाश्चदेवताः संपूजकानां
प्रतिपालकानांयतींद्रयोगींद्रतपोधना

बा॰ नो देशस्य राष्ट्रस्य कुलस्य राज्ञः करोतु शां
प॰ तिं भगवान्कुलेशः नंदंतु साधककुलान्व
८॰ यदर्शिकायेस्पष्टायनाख्यचक्रकृत महा
60 नयाये नंदंतु सर्वकुलकौलरताः परेयेण्य
येविशेषपदभेदकशोभवाये नंदंतु सि
द्धगुरवः स्वगुरुक्रमोद्धाज्येष्ठानुगाः सम
यिनो वटुकाः कुमार्य्यःश्च योगिनीश्चवरवी
र कुलप्रसूता नंदंतु भूमिपतयो द्विजसा
धुलोकाः नंदंतु नीतिनिपुणा निरव
द्यनिष्ठा निर्मत्सरा निरुपमा निरपद्रवा
श्च नित्या निरंजनरता गुरुभावो निरीहाः
शाक्ताश्च शांतमनसोप्यनशोक शंकाः
नंदंतु योगनिरताः कुलयोगयुक्ताश्चावा
र्य्यासामयिकसाधकपुत्रकाश्च गावो द्वि
जाश्च वनयो यतयः कुमार्यो धर्म्मे भवंतु नि
रताः गुरुभक्तियुक्ताः नंदंतु साधकवरा

याः संस्थिताधातुषु उल्कासोर्मिमरुत्तरंगनिलयाः ×

प्रणिमायनिष्ठाः श्रीपाः पतंतुसमय
हृद्वियोगिनीनां साधंभवीस्फुरंतुका
पिममाद्यवस्थायस्यो गुरोश्चरणपंकज
मेवलभ्यं याश्चक्रक्रमभूमिकावसतयो
नाडीषुयाः संस्थितायाःकायद्रुमरोमकू
पनिलयानिः श्वासवासाश्चयाश्चादेव्यो
रिपुभस्मभक्षणपराश्चपंतुकौलार्चिताः
यादिव्यक्रमपालिकाः क्षितिगतायादेव
तालोयगायानित्यंप्रथिन प्रभाःशिखि
गतायामानरिश्चाश्चया याव्योमामृतमं
उलामृतमयाःसर्वगाः सर्वदातासर्वाःकु याः
लमार्गपालनपराःशांतिप्रयच्छंतुमे
ऊर्ध्वब्रह्मांडतोवादिविगगनतलेभूत
लेनिष्कले वापातालेवावनेवासलिल
पवनयोर्यत्रकुत्रस्थितावा क्षेत्रपीठो
पपीठादिषुचकृतपदाधूपदीपालिमा

बा॰ मैः प्रीतादेव्यः सदानः कृतविधिवलिना
प॰ पोतवीरेंद्रवंद्याः वलाक्षीशोषडगोगुह
८१ वटुकगणाभैरवाः क्षेत्रपालादित्यरुद्र (वेताला)
61 ग्रहवसुमनुसिद्धाप्सरोगुह्यकाद्याः भू
तागेयवविद्याधरऋषिपितृयक्षासुरा
हिश्रमूनायोगीशाश्चारणाः किम्पुरुष
मुनिसुराश्चक्रगाः पांतुसर्वेंदेहस्यावि
लदेवतागजमुखाः क्षेत्राधिपाभैरवा
योगिन्योवटुकाश्चयक्षपितरोभूताःपि
शाचाग्रहाः अन्येभूचरदिक्चराश्चखच
रावेतालकाश्चेटकाः तृप्तास्तुःकुलपु
त्रकस्यपिवतःपानेसदीपंचरुं सन्त्ये
वेहुरुवाक्यमेवपितृदेवाः शेषवयो
गिनीप्रीतिश्चेत्परदेवतावयदिचेद्दाः
प्रमाणंचवेत् शाक्तेयेयदिदर्शनेभव
तिवेदाद्देयमेषास्तिचेत् संन्यत्रापिच

कौलिकाश्चयदिचेन्त्स्यान्मेजयःसर्वदा
त्वंप्येवमानरःसर्वाःसमुद्राःसगणाधि
पः योगिन्यःक्षेत्रपालाश्चममदेहेव्यव
स्थिताःशिवाद्यवनिपर्यंतंब्रह्मादिस्तंभ
संयुतं कालाग्न्यादिशिवांतंचजगद्यज्ञे
नतर्प्यतु यदिस्वेदंनमेह्वीरान्वीरवंदन
माचरेत् स्वेह्वीरान्नमेह्वीरान्मंत्रसिद्धिः
प्रजायते शांतिस्तोत्रंपठित्वा वीरवंदन इति
स्तोत्रंपठेत् जगत्त्रयाभ्यर्विनशासनेभ्यः
परार्थसंपादनकोविदेभ्यः समुद्धृतक्ले
शमहोरगेभ्योनमोनमः साधकनाय
केभ्यः प्रहीनसर्वाश्रयवासनेभ्यः सर्वा
र्थतत्त्वोदितसाधनेभ्यः सर्वप्रजाभ्युद्धर
णोदितेभ्योनमोनमः २ निस्तीर्णसंसार
महार्णवेभ्य स्तस्मालतोन्मूलनतत्परे
भ्यः जरारुजामृत्युनिवारकेभ्योनमोन

बा॰ पं॰ ८२ 62

मः ३ सद्धर्मरत्नाकरभाजनेभ्यो निर्वाण
मार्गोत्तमदेशिकेभ्यः सर्वज्ञसंपूर्णमनो
रथेभ्यो नमो नमः ४ लोकानुकंपाभ्युदि
तादरेभ्यः कारुण्यमैत्रीपरिभाविनेभ्यः
सर्वार्थचर्यापरिपूरकेभ्यो नमो न विध्वस्त
निःक्लेशकुवासनेभ्यो ज्ञानाग्निनादग्धम
लेंधनेभ्यः प्रज्ञाप्रतिज्ञापरिपालकेभ्यो
नमो नमः ६ सर्वार्थिनाशापरिपूरकेभ्यो
वैनेयपद्माकरबोधकेभ्यः विस्तीर्णसर्वा
र्थगुणाकरेभ्यो नमो नमः ७ अनंतकर्मा
र्जितशासनेभ्यो ब्रह्मेन्द्ररुद्रादिनमस्कृ
तेभ्यः परंपरानुग्रहकारकेभ्यो नमो न
मः ८ विमग्रभूतादिमहाभयेभ्यो मपंच
काचारपरायणेभ्यः समस्तसौभाग्यक
लाकरेभ्यो नमो नमः विमग्रडक्कर्मजवा
सनेभ्यः समंततोऽत्यमहायशोभ्यः ल

भ्यो मलज्ञानहृन्तास्वदेभ्यो नमो नमः
शोभविशोभवेभ्यः सर्वागमांभोधिमहा
स्त्रवेभ्यः श्रीचक्रपूजार्थपरायणेभ्यः
श्रीवीरचर्याचरणक्षमेभ्यो नमो नमः
श्रीमंत्रकोटिस्तुतिभूषणेभ्यो द्वाविंशाड
लासदशान्तिगेभ्यः श्रद्वैततत्त्वामृतभा
जनेभ्यो नमो नमः षड्विंशतालक्षणभू
षितेभ्यः प्रफुल्लपद्माकरलोचनेभ्यः प्र
तप्तचामीकरविग्रहेभ्यो नमो नमः संबो
धसेभारससंस्थितेभ्यः संसारनिर्वाणवि
दर्शकेभ्यः महाकृपावेष्टितमानसेभ्यो
नमो नमः परैकविज्ञानरसाकुलेभ्यो वा
माश्रिताचारभयानकेभ्यः स्वानंदविश्व
लजगत्क्षमेभ्यो नमो नमः श्मशानचर्या
समहाफलेभ्यो मोहांधकारापहृतिक्षमे
भ्यः परंपराज्ञापरिपालकेभ्यो नमो नमः

विधूतकेशालिकपालकेभ्यः स्फारसवार
बा॰ क्रविलोचनेभ्यः नवीनकांतारनर्तत्परे
प॰ भ्यो नमो नमः विभूतिलिप्तांगदिगंबरे
६३ भ्यश्छिन्नाग्निधूमालिभयानकेभ्यः कपा
63 लपात्रासृक्तपानकेभ्यो नमो नमो भैरववि
भैरवेभ्यः सिद्धहृत्काथानमहामुनिभ्यः
श्रीभैरवाचारहृत्कृतानादरेभ्यः स्वाधीन
नान्य कृतनिर्जरेभ्यो नमो नमो भैरववि
भैरवेभ्यः प्रशांतशास्त्रार्थविचारकेभ्यो
निवृत्तनानारसकारसकाव्यकेभ्यः निर
स्तनिःशेषविकल्पनेभ्यो नमो नमः स्वा
त्मैकभावांतरिताश्रायेभ्यः सायुज्यसाम्रा
ज्यसखाकरेभ्यः श्रीसच्चिदानंदितविग्रहे
भ्यो नमो नमो परप्रसादास्पदमानसे
भ्यो ब्रह्माद्वयज्ञानरसाकुलेभ्यः शिवोऽह
मित्याश्रितचेतनेभ्यो नमो नमः भैरवभै

रवेभ्यः सर्वथासर्वदासर्वैःसर्वैश्चटच्चटा
दिमत् अगज्ञानितविस्तारेब्रह्मेदमिति
वेद्म्यहं ब्रह्मैवपरोहंसः शिवः परम
कारणे सत्प्राणेसत्वपश्चात्मालीनः स
मरसंगतः सच्चिदानंदनिलयं परंपर
मकारणं शिवाद्वयप्रकाशाखंडरूपाम
लंधामधीमहि अनेनवीरस्तवकीर्तने
नसमुद्र नक्लेशास्ववासनोहं संसारको
नारमहार्णवेस्मिन्निमज्जमानंजगदुद्धरे
ये नेदंतस्यापकासर्वे विनश्यंतुविह
घ्नकाः अवस्थाशंभवीमेस्तुप्रसन्नोस्तु
गुरुःसदा इतिपठन्सर्वान्सामयिकान
भिषिंच्य विशेषार्घ्यपात्रमुद्धृत्यशिरसि
स्थितायगुरवेसमर्प्य तत्पादुकांशिःस
मभ्यर्च्य मूलविद्यायागुरुपादुकाविद्यां
नेचस्वाहेति स्वमूलाधारकुंड लिन्यात्म

बा॰ कपर्द्देवतामुखेहवनकुर्य्यानज्जलेपा
प॰ त्रेनरेकृत्वाश्नीयात् शेषंप्रियशिष्याय
६४ प्रसादरुद्भ्रांकिंचिद्दद्यात् सोपिस्वपा
64 त्रेकृत्वानजलेप्राश्नीयात् इत्यमर्घ्यप्र
तिपत्तिः ततःस्वगुरूपदिष्टविधिनाशे
षकृत्यंसमापयेत् ततस्तांप्रागेयप्र दिपात्रे
ख्यातत्वितंजलमादृत्य नमोविवस्व
तेब्रह्मभास्वतेविष्णुतेजसे जगत्सवित्रे
शुचयेसवित्रेकर्मदायिने ह्रांह्रींहंसःसू
र्य्यपार्षदेभ्यःस्वाहेतिसूर्य्यायार्घ्यंदत्वाकृ
तांजलिः यन्मयाछिद्रेणपाछिद्रंयच्छिद्रंपू
जनेमम सर्वंतदच्छिद्रमस्तुभास्कर
स्यप्रसादतः इत्यच्छिद्रमवधारयेत्
ततोमूलविद्यायाः प्राणायामत्रयंकृ
त्वा ऋष्यादिकरषडंगन्यासान्विधाय
प्रागुक्तगुरुस्तोत्रंपठित्वाश्रीगुरुंप्रण

स्य मूलविद्याया द्वितीयबीजेन निर्मा
ल्यं शिरसि धृत्वा मूलविद्यया पवचर
णोदकं स्वीकृत्य श्रीपरदेवताभक्तेभ्यो
नैवेद्यादिकं दत्वा स्वयमपि भुक्त्वा स्वात्मा
नं कामकलारूपं भावयन् सुखं विहरे
दिति शिवे [illegible] इति श्री
रुद्रयामले तंत्रे बालात्रिपुरसुंदरीप
द्धतिः संपूर्णा समाप्ता ॥

बा॰
क॰
१

श्रीदेव्युवाच देवदेवमहादेवभक्तानां श्री
तिवर्धनं सूचितं यन्महादेव्याः कवचं क
थयस्व मे १ श्रीमहादेव उवाच शृणु दे
वि प्रवक्ष्यामि कवचं देव दुर्लभं अप्रका
श्यं परं गुह्यं साधकाभीष्टसिद्धिदं कव
चस्य ऋषिर्देवि दक्षिणामूर्तिरव्ययः पं
क्तिः छंदः समुद्दिष्टं देवी त्रिपुरसुंदरी य
मीर्थकाममोक्षाणां विनियोगस्तु साध
ने वाग्भवः पातु शीर्षे कामराजस्त
था हृदि शक्तिबीजं सदा पातु नाभौ
गुह्ये च पादयोः ऐं क्लीं सौः वदने पातु
बालामां सर्वसिद्धये हसकलह्रीं सदा
पातु भैरवी कंठदेशतः सुंदरी नाभिदे
शे व्याच्छीर्षे कामकला सदा भ्रूनासयो
रंतराले महात्रिपुरसुंदरी ललाटे सु
भगा पातु भगा मां कंठदेशतः भगोद

मे.

यातुहृदयेउदरेभगसर्पिणी भगमा
लानाभिदेशेलिंगेपातुमनोभवा गुह्ये
पातुमहादेवीराजराजेश्वरीशिवा चैत
न्यरूपिणीपातुपादयोर्जगदंबिका ना
रायणीसर्वगात्रेसर्वकार्येशुभंकरी ब्र
ह्माणीपातुमांपूर्वेदक्षिणेवैष्णवीतथा
पश्चिमेपातुवाराहीउत्तरेतुमहेश्वरी आ
ग्नेयांपातुकौमारीमहालक्ष्मीश्चनैरृते
वायव्यांपातुचामुंडाइंद्राणीपातुईशके
जलेपातुमहामायापृथिव्यांसर्वमंगला
आकाशेपातुवरदासर्वतोभुवनेश्वरी
इदंतुकवचंनामदेवानामपिदुर्लभं प
ठेत्स्नातःसमुत्थायशुचिःप्रयतमानसः
नाधयोव्याधयस्तस्यनभयंचक्कचिद्भवेत्
नचमारीभयंतस्यपातकानांभयंतथा
नदारिद्र्यवशंगच्छेत्तिष्ठेत्मृत्युवशेनच

बा

कं॰

२

2

गच्छेच्छिवपुरं देवि सत्यं सत्यं वदाम्यहं इ
दं कवचमज्ञात्वा श्रीबालायां पठेच्छिवे
स नाप्नोति फलं तस्य प्राप्नुयाच्छस्त्रघातकं

इति श्रीबालात्रिपुराकवचं समाप्तम्

बा
सं. १
2

शौनकउवाच कैलासशिखरेरम्येनानापु
ष्पोपशोभिते कल्पपादपमध्यस्थेगण
गंधर्वसेविते मणिमंडपमध्यस्थेनानार
त्नोपशोभिते तंकदाचित्सुखासीनंभगवं
तंजगद्गुरुं कपालखट्वांगधरंचंद्रार्धकृ
तशेखरं त्रिशूलडमरुहस्तंमहावृषभ
वाहनं ३ जटाजूटधरंदेवंवासुकीकंठभू
षणं विभूतिभूषणंदेवंनीलकंठंत्रिलो
चनं द्वीपिचर्मपरीधानंशुद्धस्फटिकस
न्निभं सहस्रादित्यसंकाशंगिरिजार्धांग
भूषणं प्रणम्यशिरसानाथंकारणंविश्व
रूपिणं कृतांजलिपुटोभूत्वाप्राहतंशि
खिवाहनं कार्तिकेयउवाच देवदेवम
हादेवसृष्टिस्थितिलयकारक त्वंगतिः स
र्वदेवानांत्वंगतिःसर्वदेहिनां त्वंगतिः
सर्वलोकानांदीनानांनाथपवहि त्वमे

वज्रदाधारस्त्वमेवविश्वकारणं त्वमेवहि
त्वं सर्वदेवानां त्वदन्योनास्तिमेगतिः किंगुह्यं
परमंलोकेकिमेकंसर्गसिद्धिदं ९ किमे
कंपरमंसृष्टिः किंभोगैश्वर्यमोक्षदं विना
तीर्थेनतपसाविनावेदैर्विनामखैः वि
नालयेनध्यानेनकथंसिद्धिमवाप्नुयात्
कस्माडत्पद्यतेसृष्टिःकस्मिंश्चप्रलयोभवे
त् कस्माडतीयंतेदेवसंसारास्मिवसंक
टात् तदहंश्रोतुमिच्छामिकथयस्वमहे
श्वर ११ श्रीमहादेवउवाच साधुसाधुत्वया
पृष्टंगमपार्वतितेदत श्रास्तिगुह्यतमंगु
ह्यकथयिष्याम्यहंतव १२ सत्वंरजस्तम
श्चैवब्रह्माविष्णुशिवादयः येचान्येवहि
वोभूत्वासर्वेप्रकृतिसंभवाः सैवदेवीप
राशक्तिर्महात्रिपुरसुंदरी सैवप्रसूयते
विश्वंविश्वंसैवप्रपाल्यते सैवसंहरतेवि

बा॰
स॰
२
2

स्थंजगतांसचराचरं आधारःसर्वभूतानां
सैवरोगार्त्तिहारिणी इच्छाक्रियानथाज्ञाने
ब्रह्माविष्णुशिवात्मिका आद्याशक्तिस्वरू
पेणसृष्टिस्थितिविनाशिनी सृज्यतेब्रह्म
रूपेणविष्णुरूपेणपाल्यते ह्रियतेरुद्ररू
पेणजगदेतच्चराचरं यस्यांयोनौजगत्स
र्वंवर्त्ततेयापिवाखिले यस्यांप्रलीयतेचां
तेयस्यांसंजायतेपुनः यांसमाराध्यत्रैलो
क्येसंप्राप्तंपदमुत्तमं तस्यानामसहस्रंते
कथयामिशृणुष्वतत् ॐअस्यश्रीबाला
त्रिपुरासहस्रनामस्तोत्रमंत्रस्य श्रीदक्षि
णामूर्त्तिऋषिः पंक्तिश्छंदः श्रीबालात्रि
पुरादेवता ऐंबीजं सौःशक्तिः क्लींकील
कं धर्मार्थकाममोक्षार्थेविनियोगः प्रकी
र्त्तितः अथध्यानं आधारेतरुणार्कबिंबस
दृशंहेमप्रभावाग्भवं बीजंमन्मथमिंद्र

गोपसहस्रांहृत्पंकजेसंस्थितं चक्रेवाल
मवेशशांकरुचिरेवीजेन्द्रनाम्नीयकं येप्पा
यंतिपदत्रयंनवाशिवेनेयोनिस्त्रह्मांगतिं
कल्याणीकमलाकालीकरालीकामरूपि
णी कामाख्याकामदाकाम्याकामनाका
मचारिणी कालरात्रिर्महारात्रीकामिनी
कालरूपिणी कौमारीकरुणामूर्त्तिःकलि
कल्मषनाशिनी कात्यायिनीकलाधारा
कौमुदीकमलप्रिया कीर्त्तिदाबुद्धिदामे
धानीतिदानीतिवत्सला माहेश्वरीमहा
मायामहातेजामहेश्वरी महाजिह्वामहा
लोलामहादंष्ट्रामहाभुजा महामोहांध
कारघ्नीमहामोक्षप्रदायिनी महादारिद्र
राशिघ्नीमहाशत्रुविमर्दिनी महाकाया
महावीजामहापातकनाशिनी महाम
खामंत्रमयीमणिपूरनिवासिनी महा

बा॰
स॰
१

शक्तिर्महाज्योतिर्महासुरविमर्द्दिनी मा
नसीमानदामान्यामनश्चक्षुरगोचरा
गणमाताचगायत्रीगणगंधर्वसेवि
ता गिरिजागिरिशासाक्षीगिरिस्थागिरि
संभवा चंडेश्वरीचंडरूपाप्रचंडाचंडमा
लिनी चर्चिकाचर्चिताकाराचंडिका
चारुरूपिणी स्वरूपारूपसंस्थाचस्वरू
पारूपरूपिणी यज्ञेश्वरीयज्ञरूपाजय
यज्ञपरायणा यज्ञमातायज्ञभोक्ताय
ज्ञेशीयज्ञसंभवा यज्ञासिद्धिःक्रियासि
द्धिर्यज्ञांगीयज्ञरक्षका यज्ञप्रियायज्ञ
रूपायाज्ञीयाज्ञकृतालया जालंधरीज
गन्माताजातरूपाजगत्प्रिया जितेंद्रिया
जितक्रोधाजननीजन्मदायिनी गंगा
गोदावरीगोरीगोतमीचशतद्रुका घु
र्घुरावेदगर्भाचदेविकाकरसंभवा

सिंधुर्मंदाकिनी क्षिप्रा यमुना च सरस्वती
चंद्रभागा विपाशा च गंडकी विंध्यवासिनी
नर्मदा कङ्कावेरी वेत्रवत्या च कौशिकी
महेंद्रतनया चैव अहल्या पंचकावती
अयोध्या मथुरा माया काशी कांची अवंति
का द्वारावती च तीर्थेशी महाकिल्बिषना
शिनी पद्मिनी पद्ममध्यस्था पद्मकिंजल्क
वासिनी पद्मवक्त्रा च पद्माक्षी पद्मस्था पद्म
संभवा ह्रींकारी कुंडली धात्री हृत्पद्मस्था
म्हलोचना श्रींकारी भूषणा लक्ष्मी क्लींका
री क्लेशनाशिनी हरिप्रिया हरेर्मूर्तिर्हरिने
त्रकृतालया हरिवक्षोद्भवा शांता हरिव
क्षोस्थितालया वैष्णवी विष्णुरूपा च विष्णु
मातृस्वरूपिणी विष्णुमाया विशालाक्षी
विशालनयनोज्ज्वला विश्वेश्वरी च विश्वा
त्मा विश्वेशी विश्वरूपिणी शिवेश्वरी शि

बा॰ सं॰ ५

वाराण्याशिवनाथश्शिवप्रिया शिवमाताशि
वानीचशिवदाशिवरूपिणी भवेश्वरीभ
वाराण्याभवेशीभवनायिका भवमाताभवा
गम्याभवकंटकनाशिनी भवप्रियाभवानं
दाभवानीभवमोचनी गीतिर्वरीण्यासावि
त्रीब्रह्मरूपिणी ब्रह्मेशीब्रह्मदाब्राह्मीब्रह्मा
णीब्रह्मवादिनी दुर्गस्थादुर्गरूपाचदुर्गा
दुर्गार्तिनाशिनी दुर्गदेहांतकादुर्गरूपिणी
दुर्गतारिणी दुरितघ्नीदुराराध्यादुरादुष्कृ
तिनाशिनी त्वगस्थात्वगरूपाचत्वगात्वगा
र्तिहारिणी पंचस्थापंचमीपूर्णापूर्णपी
ठनिवासिनी सत्वस्थासत्वरूपाचसत्वदा
सत्वसंभवा रजस्थारजरूपाचरजोगुण
समुद्भवा तामसीचतमोरूपातामसीता
मसप्रिया तमोगुणसमुद्भूतासात्विकी
राजसीतमी कलाकाष्ठानिमेषाचसत्कृ

नानंदरूपिणी अर्थमात्राचमात्राचसेव
न्सरस्वरूपिणी प्रगल्भाप्रगरूपाचकल्प
ल्पाकल्परूपिणी नानारत्नविचित्रांगी
नानाभरणमंडिता विश्वात्मिकाविश्वमा
ताविश्वपाशविदारिणी विश्वासकारि
णीविश्वाविश्वशक्तिर्विचक्षणा जपाकु
सुमसंकाशादाडिमीकुसुमोपमा चतु
रंगीचतुर्बाहुश्चतुराचारुहासिनी सर्वे
शीसर्वदासर्वासर्वज्ञासर्वदायिनी स
र्वेश्वरीनसर्वाचाशर्वाणीसर्वमंगला
नलिनीनंदिनीनंदाआनंदानंदवर्धिनी
व्यापिनीसर्वभूतेषुभवभारविनाशिनी
कुलीनाकुलमध्यस्थाकुलधर्मोपदेशिनी
सर्वशृंगारवेशाढ्यापाशांकुशकरोद्य
ता सूर्यकोटिसहस्राभाचंद्रकोटिनिभा
नना कंदर्पकोटिलावण्याविष्णुकोट्य

बा॰ स॰ ५

5

विमर्दिनी गणेशकोटिलावण्याश्रीदको
टिधनप्रदा दावाग्निकोटिज्वलिनीरुद्रको
ट्युग्ररूपिणी समुद्रकोटिगंभीरावायुको
टिमहाबला आकाशकोटिविस्तारायम
कोटिभयंकरा मेरुकोटिसमुच्छ्रायागण
कोटिसमृद्धिदा निष्कलंकानिराधारानि
र्गुणागुणवर्जिताः अशोकाशोकरहिता
तापत्रयविवर्जिता विशिष्टाविश्वजननी
विश्वमोहविदारिणी विचित्रांगीविशिष्टा
चहेतुगंभीकुलेश्वरी इच्छाशक्तिर्ज्ञानश
क्तिःक्रियाशक्तिःशुचिःस्मृता श्रुतिस्मृ
तिमयीसत्याश्रुतिरूपाश्रुतिप्रिया श्रुति
प्रज्ञामहासत्तापंचतत्वोपरिस्थिता पार्व
तीहिमवत्पुत्रीपरस्थापाररूपिणी जये
तीभद्रकालीचअहल्याकुलनायिका
भूतधात्रीचभूतेशीभूतस्थाभूतभाविनी

महाकुंडलिनी शक्तिः महाभववर्षिणी
हंसाक्षी हंसमन्त्ररूपा च हंसस्था हंसरूपिणी
सोमसूर्याग्निमध्यस्था मूलाधारनिवासि
षड्पत्राम्भोजमध्यस्था मणिपूरनिवासिनी
द्वादशारसरोजस्था सूर्यमंडलवासिनी
अकलंका शशांकाभा षोडशारनिवासिनी
द्विपत्रदलमध्यस्था ललाटमध्यवासिनी
डाकिनी राकिनी चैव लाकिनी काकिनी तथा
शाकिनी हाकिनी चैव षट्चक्रनिवासि
नी सृष्टिस्थितिविनाशा च सृष्टिस्थित्यंत
कारिणी श्रीकंठप्रिया श्रीकंठनादाख्या
बिंदुमालिनी चतुःषष्टिकलाधारा देहदं
डसमाश्रया महाकाली ध्वनिमेया सृया
त्रष्टिर्महाध्वनिः हिंगुला मंगला सीता सु
षुम्णामध्यगामिनी पराघोरकरालाक्षी
विजयाजयशालिनी सत्पद्मनिलयाभी

बा॰ स॰ ८ 6

मामहाभैरवनादिनी आकाशलिंगसंभू
ताभुवनोद्यानवासिनी महासूक्ष्मा चकं
कालीभीमरूपामहाबला मेनकागर्भ
संभूतातप्तकांचनसन्निभा अंतस्थाकूट
बीजाचत्रिकूटाचलवासिनी वर्णाख्याव
र्णरहितापंचाशद्वर्णभेदिनी विद्याधरी
लोकधात्रीअप्सराअप्सरःप्रिया दक्षादाक्षा
यणीदीक्षादक्षयज्ञविनाशिनी यशस्वि
नीयशःपूर्णायशोदागर्भसंभवा देवकी
देवमानाचराधिकाकृष्णवल्लभा अरुंध
तीशचीइंद्राणीगंधारीगंधमोदिनी ध्या
नातीताध्यानगम्याध्यानाध्यानधारि
णी लंबोदरीचलंबोष्ठीजांबवत्याजलो
दरी महोदरीमुक्तकेशीमुक्तिकामार्थ
सिद्धिदा तपस्विनीतपोनिष्ठासुपर्णाध
र्मभाषिणी बाणचापधराधीरापांचाली

पंचमप्रिया शुद्धागंभीरागगहनागुह्यन
वनिरंजना अशरीराशरीरस्थासंसारा
र्णवतारिणी अमृतानिष्कलाभद्रासक
लाकृष्णपिंगला चक्रेश्वरीचक्रहस्तापा
रचक्रविदारिणी पद्मरागप्रतीकाशा
निर्मलाकाशसन्निभा ऊर्ध्वस्थाऊर्ध्वरूपा
चऊर्ध्वपद्मनिवासिनी कार्यकारणकर्त्री
चस्पर्शरूपसंस्थिता रसतत्त्वरसमध्य
स्थागंधस्थागंधरूपिणी परब्रह्मस्वरू
पाचपरब्रह्मनिवासिनी शब्दब्रह्मस्वरू
पाचशब्दस्थाशब्दवर्जिता सिद्धिःऋद्धिः
पराहृद्धिःसंकीर्तिदीप्तिसंस्थिता सगुह्या
शांभवीशक्तिस्तत्त्वज्ञानतत्त्वरूपिणी सर
स्वतीभूतमाताममहाभूताधिपप्रिया क्र
तिःप्रज्ञाःधर्मसिद्धिर्दक्षकन्यापराजिता:
कामसंदीपिनीकामामदाकामऊलह

बा॰ सं॰ ८

ला भोगोपचारकुशलाग्रमलाप्रमलानना
भक्तानुकंपिनी मैत्री शरणागतवत्सला
रथिनी भंजिनी सेना सर्वमंत्रमयी त्रयी
ज्ञानमुद्रा महामुद्रा जपमुद्रा महोत्सवा
महस्रभुजविक्रान्तिसहस्रादी सनातनी
सिद्धलक्ष्मी महालक्ष्मी राज्यलक्ष्मी सुलक्ष
णा यज्ञसारा तपसारा धर्मसारा जनेश्वरी
विश्वोदरी योगपट्टा विश्वात्मा विश्वतोमु
खी विश्वघ्राणा च विश्वात्मा विश्वपादा पदा
त्मिका तरुणादित्यसंकाशा किरणानेक
संकुला जटाजूटधराशुक्ला सूक्ष्माशोणि
विभूषणा द्वीपिचर्मपरिधाना चीरवल्क
लधारिणी त्रिशूलडमरूधरा नरमाला
विभूषणा अत्युग्ररूपिणी चोग्रा कल्पान्त
दहनोपमा त्रैलोक्यसाधिनी साध्या सिद्धि :
साधकवत्सला सर्वविद्यामयी सारास्त्र

सुरांशाविदारिणी सुभगासुमुखीसौम्या
सुशूरासोमभूषणा शुद्धस्फटिकसंकाशा
महावृषभवाहिनी महिषीमहिषारूढा
महिषासुरघातिनी दमिनीदामिनीदांता
दयादुग्धीदुरापहा अग्निजिह्वामहाघोर
घोरघोरतराननाः नारायणीनारसिंहीनृ
सिंहहृदयस्थिता योगेश्वरीयोगरूपायो
गमानाचयोगिनी खेचरीभूचरीखेला॥
निर्वाणपदसंश्रया नागिनीनागकन्याच
सुरेशानाकनायिका विषज्वालावतीदी
माउलाशनविभूषणा तीव्रवक्त्रामहा
वक्त्रावक्त्राणांकोटिधारिणी महात्माचा
नित्यमत्तात्यमीनिसुखदायिनी क्रूसमूर्धा
महामूर्धाघोरमूर्धावराननाः सर्वेंद्रिय
मनोमानासर्वेंद्रियमनोमयी सर्वसंग्रा
मजयदासर्वप्रहरणोद्यता सर्वपीठोप

बा॰
स॰
८

शमनी सर्वारिष्टविनाशिनी सर्वैश्वर्यस
मुत्पत्तिः सर्वैर्ग्रहविनाशिनी भीतिघ्नी भ
क्तिगम्या च भक्तानामार्तिनाशिनी मातं
गी मतंगमातंगी मतंगगणमंडला गंडमं
डितनाटंकाशुंजाहारविभूषणा संगीत
रंगरचना वीणावाद्यकुतोहला समस्तो
दधिमध्यस्था प्रवालावत्सलोज्वला मणि
मंडपमध्यस्था रत्नसिंहासनस्थिता पर
मानंदमुदिता ईषत्स्मितानना कुमु
दाललितालोलालाक्षा लोहितलोचना
दिग्वासा देवदूती च देवदेवाधिदेवता सिं
होपरिसमारूढा हिमाचलनिवासिनी
अट्टहासिनी घोराघोरदैत्यविनाशिनी
अत्युग्रारक्तवसना नागकेयूरमंडिता मु
क्ताहारशोभोपेता तुंगपीनपयोधरा र
क्तोत्पलदलाकारा सुधाघूर्णितलोचना

समस्तादेवमूर्तीचश्रस्त्ररत्नयकारिणी
खड्गिणीशूलहस्ताचचक्रिणीचाक्षमालि
नी शंखिनीचापिणीबाणावज्रिणीवज्रदं
डिनी श्रानंदोहीपमध्यस्थाकटिसूत्रेरलं
कृता नानाभरणादीसंगीनानामणिवि
भूषिता जगदानदसंभूतिःचिंतामणिगु
णाकरा त्रैलोकानमितापूज्याचिन्मयाने
दरूपिणी त्रैलोक्यदंडिनीदेवीडःखडःख
मनाशिनी डराग्निदाहशमनीराजदैवाधि
शालिनी महापरापराशिघ्नीमहावैरिभ
यापहा रागादिदोषरहिताजरामरणव
र्जिता चंद्रमंडलमध्यस्थापीयूषार्णवसं
भवा सर्वदेवस्तुतादेवीसर्वसिद्धनमस्कृ
ता अचिंत्यशक्तिरूपाचमणिमंत्रमहौष
धी स्वस्तिस्वस्तिमतीबालामलयाचलवा
सिनी धात्रीविधात्रीसंहारारतिज्ञारति

बा॰
स॰
४९

दायिनी रुद्राणीरुद्ररूपा च रौद्रीरुद्रार्ति
नाशिनी सर्वज्ञाचारथमंत्रारसज्ञादीन
वत्सला अनाहताविनयनानिर्भरानिर्हे
तिःपराः परावीरकरालाज्ञीसमाताप्रिय
दायिनी मंत्रात्मिकामंत्रगम्यामंत्रमंत्राम
मंत्रिणी अद्वानंदामहाभद्रानिर्द्वन्द्वानिर्गु
णात्मिका धरिणीधारिणीपृथ्वीधराधा
त्रीवसुंधरा मेरुमंदिरमध्यस्थास्थिराशं
करवल्लभा श्रीमहीश्रीमयीश्रेष्टाश्रीक
रीश्रीविभाविनी श्रीदःश्रीमा श्रीनिवासः
श्रीमतीश्रीमतांगतिः उमासारंगनीय
न्मायनधान्यसमर्हिदा ईशानीभुवनेशा
नीभुवनाभुवनेश्वरी अनंतानंतमहि
माजगत्साराजगद्भवा अचिंत्यशक्तिश्चि
न्त्यात्माचिंत्याचिंत्यस्वरूपिणी ज्ञानगम्या
ज्ञानमूर्तिःज्ञानिनीज्ञानशालिनी ....

....वनीधन्याधनधान्यसमृद्धिदा ईशा
नीभुवनेशानीभुवनाभुवनेश्वरी अनंता
नंतमहिमाजगत्साराजगद्भवा अचिंत्य
शक्तिश्चिंत्यात्माचिंत्याचिंत्यस्वरूपिणी ज्ञा
नगम्याज्ञानमूर्त्तिःज्ञानिनीज्ञानशालिनी
अमितावोररूपाचसुधाधारासुधावहा
भास्कराभास्वतीभीतिर्भास्वदुत्तानशायिनी
अनसूयाक्षमालज्जादुर्लभाभवनात्मिका
विश्ववंद्याविश्ववीजाविश्वज्ञीविश्वसंस्थि
ता शीलस्थाशीलरूपाचशीलाशीलप्र
दायिनी वोधिनीवोधकुशलरोधिनीक्रो
धिनीतथा विद्योतिनीविचित्रात्माविद्यु
त्पटलसन्निभा विश्वयोनिर्महायोनिःक
र्मयोनिःप्रियंवदा रोहिणीरोगशमनी
महारोगहरापरा वरदापुष्टिदादेवीमा
नदामानदप्रिया दृसांगवाहिनीदेवी

बा॰
स॰
१०

कूस्मस्महोदरा श्मशानभवी श्मशानरूपा च श्मशानस्था
श्मशानसंभवा विश्वोदरी विश्वमाता योगमु
द्रा च योगिनी वागीश्वरी योगमुद्रा योगि
नीकोटिसेविता कौलिकानंदकन्या च शृं
गाटपीठवासिनी क्षेमंकरी सर्वरूपा दिव्य
रूपा दिगंबरा धूम्रवक्त्रा धूम्रनेत्रा धूम्रके
शी च धूम्रला पिनाकी रुद्रवेताली महा
वेतालरूपिणी तपिनी तापिनी दीक्षा वि
ष्णुविद्या त्वमाश्रया मंथरा जठरा तीव्रा
ग्निजिह्वा भयापहा पशुघ्नी पशुरूपा च प
शुहा यज्ञवाहिनी पिता माता च याता च
पशुपाशविनाशिनी चंद्रप्रभा चंद्ररेखा
चंद्रकांतिविभूषणा कुंकुमांकितसर्वां
गी सुधाक्षुद्रलोचना शुक्लांबरधरा देवी
वीणापुस्तकधारिणी श्वेतवस्त्रधरा दे
वी श्वेतपद्मासनस्थिता रक्तांबरा च रक्तो

गीरक्तपद्मविभूषणा निष्ठराकूरहृद
याश्रह्रूरामिष्टभाषिणी स्वनूपमयशणो
पेतासदामधुरभाषिणी विरूपाक्षीसह
स्राक्षीशताक्षीवक्रलोचना उत्तरेतारि
णीतारान्तकणीतारहापिणी स्वधाधीरा
वचमेत्ताधर्मोश्शोगोपदेशिनी भगेश्व
रीभगाराध्याभगिनीभगनायिका भग
विम्बाभगक्लिन्नाभगयोनिर्भगप्रदा भ
गेश्वरीभगारूपाभगगुह्याभगावहा
भगोदराभगानंदाभगाढ्याभगमालिनी
मालिनीमाधवीमाधीमदरूपामदोत्क
टा भीरुंडाचंडिकाज्योत्स्नाविश्वचक्षुस्तमो
पहा सुप्रसन्नामहाहूतीयमहूतीभयं
करी उन्मादिनीमहारूपादिव्यरूपासुरा
र्चिता चैतन्यरूपिणीनित्यानित्यक्लिन्ना
मदोल्लसा मदिरानंदकैवल्यामदिरा

बा॰ ह्रीमदालसा सिद्धेश्वरी सिद्धविद्या सिद्धाया
स॰ सिद्धवंदिता सिद्धार्चिता सिद्धमाता सिद्धि
११ सर्वार्थसाधिता मनोमयी गुणातीता परं
ज्योतिःस्वरूपिणी परेशी पारगा पारा परा
सिद्धिःपरागतिः वाग्देवी वशिनी चैव दे
वी कामेश्वरी तथा मोहिनी विमला देवी
अरुणा जयिनी परा सर्वेश्वरी कौलिनी च
मधुपानपरायणा वेदवेदांगजननी स
र्वशास्त्रविशारदा सर्वदेवमयी विद्या स
र्वधर्ममयीश्वरी सर्वयज्ञमयी देवी स
र्वमंत्राधिकारिणी त्रैलोक्याकर्षिणी दे
वी सर्वाद्यानंदरूपिणी सर्वसंपत्प्रति
ष्ठात्री सर्वयंत्राधिकारिणी सर्वसंक्षोभि
णी देवी सर्वविद्राविणी परा सर्वाकर्षि
णी शक्तिश्च सर्वाह्लादनकारिणी सर्व
संमोहिनी देवी सर्वस्तंभनकारिणी स

र्वजृंभिनीशक्तिश्चसर्ववशंकरीतथा स
र्वरंजिनीशक्तिश्चसर्वोन्मादस्वरूपिणी
सर्वार्थसाधनीदेवीसर्वसंपत्तिरूपिणी
सर्वमंत्रमयीदेवीसर्वद्वंद्वक्षयंकरी स
र्वसिद्धिप्रदादेवीसर्वसंपत्तिदायिनी स
र्वप्रियंकरीदेवीसर्वमंगलकारिणी स
र्वकामप्रदादेवीसर्वदुःखविमोचिनी
सर्वमृत्युप्रशमनीसर्वविघ्नविनाशिनी
सर्वांगसुंदरीदेवीसर्वसौभाग्यदायिनी
सर्वज्ञासर्वशक्तिश्चसर्वैश्वर्यफलप्रदा
सर्वज्ञानमयीदेवीसर्वव्याधिविनाशि
नी सर्वाधारस्वरूपाचसर्वपापहरातथा
सर्वानंदमयीदेवीसर्वरक्षास्वरूपिणी
सर्वलक्ष्मीमयीविद्यासर्वेप्सितफलप्रदा
सर्वदुःखप्रशमनीपरमानंददायिनी
त्रिकोणनिलयात्रिस्थात्रिमातात्रितनुस्त

बा॰
सं॰
१२
12

स्था त्रैविद्या चैव त्रिमात्रा त्रैलोक्या त्रिपुराश्र
या त्रिकोदरस्था त्रिविधा त्रिशूला त्रिपुरात्मि
का त्रियाम्नी त्रिदशाध्यक्षा त्रिश्री त्रिपुरमा
लिनी त्रिवर्णा त्रिपदी चैव त्रिमूर्त्तिस्त्रिपु
रेश्वरी त्रिदिवा त्रिदिवेशानी त्रिभिस्त्रिपुर
वासिनी त्रिपुराशी त्रिजननी महात्रिपु
रसुंदरी इति त्रिपुरसुंदर्यामेतन्नामस
हस्रकं गुह्याद्गुह्यतरं पुत्र तव प्रीत्या प्र
कीर्त्तितं गोपनीयं प्रयत्नेन पठितव्यं प्र
यत्नतः नातः परतरं पुण्यं नातः परतरं
तपः नातः परतरं स्तोत्रं नातः परतरा ग
ति स्तोत्रं सहस्रनामाख्यं मम वक्त्राद्विनि
र्गतं मोक्षार्थी लभते मोक्षं सुखार्थी लभ
ते सुखं कामानवाप्नुयात्कामी धनार्थी
लभते धनं विद्यार्थी लभते विद्यां यशो
र्थी लभते यशः कन्यार्थी लभते कन्यां सु

नार्थी लभते सुतं गुर्विणी जायते पुत्रं क
न्या विंदति सत्पतिं मूर्खोपि लभते शास्त्रं
चौरोपि लभते गतिं संक्रान्तावप्यमायां
वा अष्टम्यां च विशेषतः पूर्णिमास्यां चतु
र्दश्यां नवम्यां भौमवासरे पठेद्वा पाठ
येद्वापि शृणुयाद्वा समाहितः समुक्तः
सर्वपापेभ्यः कामेश्वरसमो भवेत् लक्ष्मी
वान्सुतवांश्चैव वल्लभः सर्वयोषितां तस्य
वश्यं भवेत्सर्वं त्रैलोक्यं सचराचरं रुद्रं
दृष्ट्वा यथा देवा विष्णुं दृष्ट्वा च दानवाः
पन्नगा गरुडं दृष्ट्वा सिंहं दृष्ट्वा यथा मृगाः
मंडूका भोगिनं दृष्ट्वा मार्जारं मूषका य
था कीटवत्प्रलयं यांति तस्य वक्त्रावलो
कनात् अग्निचौरभयं तस्य कदाचिन्नैव
संभवेत् पातका विविधास्सर्वे मेरु
मंदिरसन्निभाः भस्मसात्तत्क्षणं यांति त

बा॰ स॰ १३

13

णं वज्जितं यथा एकदा पठनादेव सर्व
पापक्षयो भवेत् दशधा पठनादेव वाक्
सिद्धिः प्रजायते सहस्रधा पठेद्यस्तु देव
रो जायते नरः सहस्रदशकं यस्तु पठेद्भ
क्तिपरायणः सोऽतस्य जगतां धात्री प्रत्य
क्षा भवति ध्रुवं लक्षपूर्णं नरो यस्तु स्तोत्र
राजं पठेत्सुधीः भवपाशविनिर्मुक्तो म
म तुल्यो न संशयः सर्वतीर्थेषु यत्पुण्यं
सर्वयज्ञेषु यत्फलं सर्ववेदेषु यत्पुण्यं त
त्फलं परिकीर्तितं तत्फलं कोटिगुणितं
सकृज्जप्त्वा लभेन्नरः श्रीमान्बलवान्स
स्यात्पुत्रवान्सर्वसंपदः तस्य स्युर्वशगाः
सर्वे यः पठेन्नित्यमेव हि देहान्ते परमं स्था
नं यत्सुरैरपि दुर्लभं स यास्यति गतांशो
कस्तवराजप्रकीर्तनात् पठस्येव सदा
भक्त्या नस्य मुक्तिर्न संशयः इति श्री वाम

केश्वरतंत्रोक्ते हरकुमारसंवादे श्रीबाला
त्रिपुरसुंदरीसहस्रनामस्तोत्रं संपूर्णं
समाप्तम् ॥

96

बां॰ स्तो॰ १

श्रीभैरव उवाच स्तुत्यानयास्तु त्रिपुरे स्तोष्याभीष्टफलाप्तये यया व्रजेत्तिमतुजालक्ष्मीस्तुरस्यपूजितो बलादयः स्तुतिपदैरपिसूक्ष्मरूपंजानंतिनैव जगदादिमनादिमूर्त्ति तस्माद्वयंकुच नम्रो नवकुंकुमाभांस्थूलां ब्रुवं जन्मातरेशुभफलैकगम्यं अन्योन्यभेदकलहाकुलमानभेदैर्जानंतिकिंजडधियस्तवरूपमेव स्थूलांवदंतिमुनयः श्रुतयोगृणंतिसूक्ष्मांवदंतिवचसामधिवासमन्ये त्वांमूलमाहुरपरेजगतां भवान्यामन्यामहेवयमपारकृपांबुराशिं चंद्रावतंसकलिनोशिरदिंदुशोभां पंचाशदक्षरमयींहृदिभावयंति त्वां पुस्तकंजपवटीमरुताश्चकुंभवाखां वह्नलकलैर्दधतीत्रिनेत्रां शोभुस्त्वम

द्भिन्नयाकलितार्धभागो विस्मृत्स्त्वमेव
कमलापरिरब्धदेहः पद्मोद्भवस्त्वमसि
वागधिवासभूमिर्लक्ष्मीक्रियाश्च जगति
त्रिपुरे त्वमेव श्रीश्रितवामभवभवो श्वत
रःपरादीन्भावान्परेषु विहितान्समुदी
रयन्ती कंठादिभिश्च करणैः परदेवतांतां
संविन्मयीं हृदिकदापि न विस्मरामि मा
ऊंच्यवाग्भवजितपवचैवैरिपद्ममालीव
चनिश्चलधियानिजनासिकाग्रं ध्याये
त्रिमूर्ध्निकलितेंदुकलावतंसे त्वद्रूपमे
वहृतिनस्मरणार्कमितं त्वंत्राणमन्म
थरिपोर्वपुरर्धभागे सृष्टिं करोषि जग
तामितिवेदवादः सत्यं न तद्गिनयेज
गदेकमातर्नो चेदशेषजगतः स्थितिर
वनस्यात् पूजां विधाय कुसुमैः सुर
पादपानांपीठेनवांवकनकाचलगह्व

बा
स्तो
२

रेषु गायंतिसिद्धवनिताःसहकिन्नरीभि
रास्वादितासवरसारुणनेत्रपद्मः विघ्न
ह्लिलासवपुषःश्रियमुद्वहंतीयोहीस्व
वामभवनाद्धिवराजधानी सुषुम्नगास
मकमलानिविकासयंतीदेवीभजेल्प
दिपरामृतसिक्तगात्रीसानंदजन्मभव
नेभवनेकृतीनांचैतन्यमात्रतनुमेवत
वाश्रयामि वह्लींद्रविस्तभिरुपासितपा
दपद्मांसौभाग्यजन्मवसतिंत्रिपुरेत्वमेव
शाहार्थभाविभवनेसृजतीदुरूपायातदि
भतिपुनरर्कतनुस्वशात्का वह्न्यात्मिका
हरतितत्सकलेयुगांतेतांशारदामन
सिजातनविस्मरामि नारायणीतिनर
कार्णवतारिणीतिगौरीतिखेदशमनी
तिसरस्वतीति ज्ञानप्रदेतिनयनत्रय
भूषितेतित्वामद्रिराजतनयेवहुधाभ

जेंति येस्तुवंतिजगन्मातःश्लोकैर्द्वादश
भिक्रमात् त्वामेवप्राप्यवाक्सिद्धिंप्राप्नु
युस्तेपरांश्रियं इतिश्रीरुद्रयामलेतंत्रे
बालात्रिपुरसुंदरीस्तोत्रंसंपूर्णंसमाप्त
म् ॥